# Brahma Gita Skanda Purana

# બ્રહ્મગીતા સ્કન્દપુરાણાન્તર્ગતા

## Document Information

Text title : Brahma Gita (Skanda Purana)

File name : brahmagiitaaskanda.itx

Category : gItA, giitaa

Location : doc_giitaa

Author : Vyasa muni (by tradition)

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, v.subrahmanian, PSA Easwaran

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# Brahma Gita Skanda Purana

# બ્રહ્મગીતા સ્કન્દપુરાણાન્તર્ગતા


શ્રીસ્કન્દપુરાણે સૂતસંહિતાયાં ચતુર્થસ્ય
યજ્ઞવૈભવખણ્ડસ્યોપરિભાગે બ્રહ્મગીતાસૂપનિષત્સુ
બ્રહ્મગીતિર્નામ પ્રથમોઽધ્યાયઃ ॥ ૧-૬૦
વેદાર્થવિચારો નામ દ્વિતીયોઽધ્યાયઃ ॥ ૧-૬૦
સાક્ષિશિવસ્વરૂપકથનં નામ તૃતીયોઽધ્યયઃ ॥ ૧-૧૧૮
તલવકારોપનિષદ્વ્યાખ્યાકથનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૧-૧૫૪
આદેશકથનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૧-૧૯૬
દહરોપાસનવિવરણં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૧-૫૮
વસ્તુસ્વરૂપવિચારો નામ સપ્તમોઽધ્યાયઃ ॥ ૧-૯૫
કૈવલ્યોપનિષદ્વિવરણે તત્ત્વવેદનવિધિર્નામાષ્ટમોઽધ્યાયઃ ૧-૫૫
બૃહાદારણ્યકોપનિષદ્વ્યાખ્યાને નવમોઽધ્યાયઃ ॥ ૧-૫૭
બૃહાદારણ્યકવ્યાખ્યાકથનં નામ દશમોઽધ્યાયઃ ॥ ૧-૫૬
કઠવલ્લીશ્વેતાશ્વેતરવ્યાખ્યાયામેકાદશોઽધ્યાયઃ ॥ ૧-૭૨
શિવસ્યાહમ્પ્રત્યાયાશ્રત્વં નામ દ્વાદશોઽધ્યાયઃ ॥ ૧-૭૭


---

॥ અથ પ્રારભ્યતે સ્કન્દપુરાણાન્તર્ગતસૂતસંહિતાયાં બ્રહ્મગીતા ॥

॥ પ્રથમોઽધ્યાયઃ ॥

। બ્રહ્મગીતિઃ ।

મુનય ઊચુઃ -
ભવતા સર્વમાખ્યાતં સઙ્ક્ષેપાદ્વિસ્તરાદપિ ।
ઇદાનીં શ્રોતુમિચ્છામો બ્રહ્મગીતામનુત્તમામ્ ॥ ૧॥

સર્વવિજ્ઞાનરત્નાનામાકરસ્ય મહાત્મનઃ ।
કૃષ્ણદ્વૈપાયનસ્યૈવ ભવાઞ્છિષ્યઃ સુશિક્ષિતઃ ॥ ૨॥

ત્વયૈવાવિદિતં કિઞ્ચિન્નાસ્તિ સત્યં પ્રભાષિતમ્ ।

યદિ પ્રસન્નો ભગવાંસ્તન્નો વક્તુમિહાર્હસિ ॥ ૩॥

સૂત ઉવાચ -
વક્ષ્યે તામાદરેણૈવ બ્રહ્મગીતામનુત્તમામ્ ।
શ્રદ્ધયા સહિતા યૂયં શ‍ૃણુત બ્રહ્મવિત્તમાઃ ॥ ૪॥

પુરા કલ્પાન્તરે દેવાઃ સર્વે સમ્ભૂય સાદરમ્ ।
વિચાર્ય સુચિરં કાલં વેદાનામર્થમુત્તમમ્ ॥ ૫॥

સંશયાવિષ્ટચિત્તાસ્તુ તપસ્તપ્ત્વા મહત્તરમ્ ।
અભિજગ્મુર્વિધાતારં પ્રષ્ટું દેવા મુનીશ્વરાઃ ॥ ૬॥

યત્રાસ્તે જગતાં નાથઃ સર્વજ્ઞઃ સર્વવિત્પ્રભુઃ ।
મહાકારુણિકઃ શ્રીમાન્બ્રહ્મા ભક્તહિતે રતઃ ॥ ૭॥

મેરુશ‍ૃઙ્ગે વરે રમ્યે સર્વયોગિસમાવૃતે ।
યક્ષરાક્ષસગન્ધર્વસિદ્ધાદ્યૈશ્ચ સુસેવિતે ॥ ૮॥

નાનારત્નસમાકીર્ણે નાનાધાતુવિચિત્રિતે ।
શકુન્તસઙ્ઘસઙ્ઘૃષ્ટે નાનાતીર્થસમાવૃતે ॥ ૯॥

ગુહાકોટિસમાયુક્તે ગિરિપ્રસ્રવણૈર્યુતે ।
મધુરાદિરસૈઃ ષડ્ભિઃ સમૃદ્ધેઽતીવ શોભને ॥ ૧૦॥

તત્ર બ્રહ્મવનં નામ શતયોજનમાયતમ્ ।
શતયોજનવિસ્તીર્ણં દીર્ઘિકાભિઃ સુસંયુતમ્ ॥ ૧૧॥

નાનાપશુસમાયુક્તં નાનાપક્ષિસમાકુલમ્ ।
સ્વાદુપાનીયસંયુક્તં ફલમૂલૈશ્ચ સંયુતમ્ ॥ ૧૨॥

ભ્રમદ્ભ્રમરસઞ્છન્નસુગન્ધકુસુમદ્રુમમ્ ।
મન્દાનિલસમાયુક્તં મન્દાતપસમાયુતમ્ ॥ ૧૩॥

નિશાકરકરૈર્યુક્તં વનમસ્તિ મહત્તરમ્ ।
તત્ર જામ્બૂનદમયં તરુણાદિત્યસન્નિભમ્ ॥ ૧૪॥

નવપ્રાકારસંયુક્તમશીતિદ્વારસંયુતમ્ ।
મહાબલસમોપેતૈર્દ્વારપાલૈશ્ચ કોટિભિઃ ॥ ૧૫॥

ખડ્ગતોમરચાપાદિશસ્ત્રયુક્તૈશ્ચ રક્ષિતમ્ ।
પુષ્પપ્રકરસઙ્કીર્ણં પૂર્ણકુમ્ભૈશ્ચ સંયુતમ્ ॥ ૧૬॥

જ્વલદ્દીપૈઃ સમાયુક્તં પુષ્પમાલાવિરાજિતમ્ ।
વિચિત્રચિત્રસંયુક્તભિત્તિકોટિસુશોભિતમ્ ॥ ૧૭॥

મુક્તાદામસમાયુક્તં વિતાનૈર્મૌક્તિકૈર્યુતમ્ ।
અભ્રગામિધ્વજૈર્યુક્તં પ્રાંશુતોરણસંયુતમ્ ॥ ૧૮॥

નૃત્યગીતાદિભિર્યુક્તમપ્સરોગણસેવિતમ્ ।
નાનાવિધમહાવાદ્યૈર્નાનાતાલૈશ્ચ સંયુતમ્ ॥ ૧૯॥

મૃદુમધ્યોગ્રશબ્દાઢ્યં નાનાકાહલસંયુતમ્ ।
વેદઘોષસમાયુક્તં સ્મૃતિઘોષસમન્વિતમ્ ॥ ૨૦॥

પુરાણઘોષસંયુક્તમિતિહાસરવાન્વિતમ્ ।
સર્વવિદ્યારવૈર્યુક્તં સર્વજ્ઞૈશ્ચ સમાવૃતમ્ ॥ ૨૧॥

અગાધજલપર્યન્તમવરોધસમન્વિતમ્ ।
રથકોટિસમાયુક્તં કોટિકોટિગજાવૃતમ્ ॥ ૨૨॥

કોટિકોટિસહસ્રૈશ્ચ મહાશ્વૈશ્ચ વિરાજિતમ્ ।
અસ્ત્રશસ્ત્રાદિસંયુક્તૈરસઙ્ખ્યાતબલાન્વિતૈઃ ॥ ૨૩॥

અસઙ્ખ્યાતૈર્ભટૈર્નિત્યં રક્ષિતં પુરમુત્તમમ્ ।
અસ્તિ પુણ્યવતાં પ્રાપ્યમપ્રાપ્યં પાપકર્મણામ્ ॥ ૨૪॥

તસ્મિન્નન્તઃપુરે શુદ્ધે સહસ્રસ્થૂણસંયુતે ।
સર્વલક્ષણસંયુક્તે સર્વાલઙ્કારસંયુતે ॥ ૨૫॥

મૃદુતોરણસંયુક્તે કલ્પવૃક્ષસમન્વિતે ।
કણ્ઠીરવમુખૈર્યુક્તે ષટ્પદસ્વનસંયુતે ॥ ૨૬॥

મૃદુતલ્પસમોપેતે રત્નનિર્મિતમણ્ડપે ।
દેવ્યા ચાપિ સરસ્વત્યા વર્ણવિગ્રહયા સહ ॥ ૨૭॥

સર્વશબ્દાર્થભૂતસ્તુ બ્રહ્મા નિવસતિ પ્રભુઃ ।
તત્ર દેવા દ્વિજા ગત્વા દદૃશુર્લોકનાયકમ્ ॥ ૨૮॥

નાનારત્નસમોપેતં વિચિત્રમુકુટોજ્જ્વલમ્ ।
રત્નકુણ્ડલસંયુક્તં પ્રસન્નવદનં શુભમ્ ॥ ૨૯॥

નાનારત્નસમોપેતહારાભરણભૂષિતમ્ ।

મહાર્હમણિસંયુક્તકેયૂરકરસંયુતમ્ ॥ ૩૦॥

વિચિત્રકટકોપેતમઙ્ગુલીયકશોભિતમ્ ।
ઉત્તરીયકસંયુક્તં શુક્લયજ્ઞોપવીતિનમ્ ॥ ૩૧॥

નાનારત્નસમોપેતં તુન્દબન્ધવિરાજિતમ્ ।
ચન્દનાગરુકર્પૂરક્ષોદદિગ્ધતનૂરુહમ્ ॥ ૩૨॥

સુગન્ધકુસુમોત્પન્નનાનામાલાવિભૂષિતમ્ ।
શુક્લવસ્ત્રપરીધાનં તપ્તજામ્બૂનદપ્રભમ્ ॥ ૩૩॥

સ્વભાસા સકલં નિત્યં ભાસયન્તં પરાત્પરમ્ ।
સુરાસુરમુનીન્દ્રૈશ્ચ વન્દ્યમાનપદામ્બુજમ્ ॥ ૩૪॥

તં દૃષ્ટ્વા સર્વકર્તારં સાક્ષિણં તમસઃ પરમ્ ।
મહાપ્રીતિસમોપેતાઃ પ્રસન્નવદનેક્ષણાઃ ॥ ૩૫॥

સઞ્જાતપુલકૈર્યુક્તા વિવશા ગદ્ગદસ્વરાઃ ।
પ્રકાશિતસુખાબ્ધ્યન્તર્નિમગ્ના નિર્મલાવૃતમ્ ॥ ૩૬॥

નિરસ્તનિખિલધ્વાન્તાઃ પ્રણમ્ય વસુધાતલે ।
શિરસ્યઞ્જલિમાધાય સર્વે દેવાઃ સમાહિતાઃ ॥ ૩૭॥

તુષ્ટુવુર્હૃષ્ટમીશાનં સર્વલોકપિતામહમ્ ।
મુક્તિદં પુણ્યનિષ્ઠાનાં દુઃખદં પાપકર્મણામ્ ॥ ૩૮॥

દેવા ઊચુઃ -
બ્રહ્મણે બ્રહ્મવિજ્ઞાનદુગ્ધોદધિવિધાયિને ।
બ્રહ્મતત્ત્વદિદૃક્ષૂણાં બ્રહ્મદાય નમો નમઃ ॥ ૩૯॥

કષ્ટસાગરમગ્નાનાં સંસારોત્તારહેતવે ।
સાક્ષિણે સર્વભૂતાનાં સાક્ષ્યહીનાય વૈ નમઃ ॥ ૪૦॥

સર્વધાત્રે વિધાત્રે ચ સર્વદ્વન્દ્વાપહારિણે ।
સર્વાવસ્થાસુ સર્વેષાં સાક્ષિણે વૈ નમો નમઃ ॥ ૪૧॥

પરાત્પરવિહીનાય પરાય પરમેષ્ઠિને ।
પરિજ્ઞાતવતામાત્મસ્વરૂપાય નમો નમઃ ॥ ૪૨॥

પદ્મજાય પવિત્રાય પદ્મનાભસુતાય ચ ।
પદ્મપુષ્પેણ પૂજ્યાય નમઃ પદ્મધરાય ચ ॥ ૪૩॥

સુરજ્યેષ્ઠાય સૂર્યાદિદેવતાતૃપ્તિકારિણે ।
સુરાસુરનરાદીનાં સુખદાય નમો નમઃ ॥ ૪૪॥

વેધસે વિશ્વનેત્રાય વિશુદ્ધજ્ઞાનરૂપિણે ।
વેદવેદ્યાય વેદાન્તવિધયે વૈ નમો નમઃ ॥ ૪૫॥

વિધયે વિધિહીનાય વિધિવાક્યવિધાયિને ।
વિધ્યુક્તકર્મનિષ્ઠાનાં નમો વિદ્યાપ્રદાયિને ॥ ૪૬॥

વિરિઞ્ચાય વિશિષ્ટાય વિશિષ્ટાર્તિહરાય ચ ।
વિષણ્ણાનાં વિષાદાબ્ધિવિનાશાય નમો નમઃ ॥ ૪૭॥

નમો હિરણ્યગર્ભાય હિરણ્યગિરિવર્તિને ।
હિરણ્યદાનલભ્યાય હિરણ્યાતિપ્રિયાય ચ ॥ ૪૮॥

શતાનન્દાય શાન્તાય શાઙ્કરજ્ઞાનદાયિને ।
શમાદિસહિતસ્યૈવ જ્ઞાનદાય નમો નમઃ ॥ ૪૯॥

શમ્ભવે શમ્ભુભક્તાનાં શઙ્કરાય શરીરિણામ્ ।
શાઙ્કરજ્ઞાનહીનાનાં શત્રવે વૈ નમો નમઃ ॥ ૫૦॥

નમઃ સ્વયમ્ભુવે નિત્યં સ્વયમ્ભુબ્રહ્મદાયિને ।
સ્વયં બ્રહ્મસ્વરૂપાય સ્વતન્ત્રાય પરાત્મને ॥ ૫૧॥

દ્રુહિણાય દુરાચારનિરતસ્ય દુરાત્મનઃ ।
દુઃખદાયાન્યજન્તૂનામાત્મદાય નમો નમઃ ॥ ૫૨॥

વન્દ્યહીનાય વન્દ્યાય વરદાય પરસ્ય ચ ।
વરિષ્ઠાય વરિષ્ઠાનાં ચતુર્વક્ત્રાય વૈ નમઃ ॥ ૫૩॥

પ્રજાપતિસમાખ્યાય પ્રજાનાં પતયે સદા ।
પ્રાજાપત્યવિરક્તસ્ય નમઃ પ્રજ્ઞાનદાયિને ॥ ૫૪॥

પિતામહાય પિત્રાદિકલ્પનારહિતાય ચ ।
પિશુનાગમ્યદેહાય પેશલાય નમો નમઃ ॥ ૫૫॥

જગત્કર્ત્રે જગદ્ગોપ્ત્રે જગદ્ધન્ત્રે પરાત્મને ।
જગદૃશ્યવિહીનાય ચિન્માત્રજ્યોતિષે નમઃ ॥ ૫૬॥

વિશ્વોત્તીર્ણાય વિશ્વાય વિશ્વહીનાય સાક્ષિણે ।

સ્વપ્રકાશૈકમાનાય નમઃ પૂર્ણપરાત્મને ॥ ૫૭॥

સ્તુત્યાય સ્તુતિહીનાય સ્તોત્રરૂપાય તત્ત્વતઃ ।
સ્તોતૃણામપિ સર્વેષાં સુખદાય નમો નમઃ ॥ ૫૮॥

સૂત ઉવાચ -
એવં બ્રહ્માણમાદિત્યાઃ સ્તુત્વા ભક્તિપુરઃસરમ્ ।
પૃષ્ટવન્તસ્તુ સર્વેષાં વેદાનામર્થમાદરાત્ ॥ ૫૯॥

બ્રહ્માઽપિ બ્રહ્મવિન્મુખ્યઃ સર્વવેદૈરભિષ્ટુતઃ ।
પ્રાહ ગમ્ભીરયા વાચા વેદાનામર્થમુત્તમમ્ ॥ ૬૦॥

ઇતિ શ્રીસ્કન્દપુરાણે સૂતસંહિતાયાં ચતુર્થસ્ય
યજ્ઞવૈભવખણ્ડસ્યોપરિભાગે બ્રહ્મગીતાસૂપનિષત્સુ
બ્રહ્મગીતિર્નામ પ્રથમોઽધ્યાયઃ ॥ ૧॥

---

॥ અથ દ્વિતીયોઽધ્યાયઃ ॥

॥ વેદાર્થવિચારઃ ॥

બ્રહ્મોવાચ -
અવાચ્ય એવ વેદાર્થઃ સર્વથા સર્વચેતનૈઃ ।
તથાઽપિ વક્ષ્યે ભક્તાનાં યુષ્માકં શૃણુતાદરાત્ ॥ ૧॥

આત્મસંજ્ઞઃ શિવઃ શુદ્ધ એક એવાદ્વયઃ સદા ।
અગ્રે સર્વમિદં દેવા આસીત્તન્માત્રમાસ્તિકાઃ ॥ ૨॥

તતો નાન્યન્મિષત્કિઞ્ચિત્સ પુનઃ કાલપાકતઃ ।
પ્રાણિનાં કર્મસંસ્કારાત્સ્વશક્તિગતસત્ત્વતઃ ॥ ૩॥

સ ઐક્ષત જગત્સર્વં નુ સૃજા ઇતિ શઙ્કરઃ ।
સ પુનઃ સકલાનેતાઁલ્લોકાનાત્મીયશક્તિતઃ ॥ ૪॥

યથાપૂર્વં ક્રમેણૈવ સુરા અસૃજત પ્રભુઃ ।
તં હરં કેચિદિચ્છન્તિ કેચિદ્વિષ્ણું સુરોત્તમાઃ ॥ ૫॥

કેચિન્મામેવ ચેચ્છન્તિ કેચિદિન્દ્રાદિદેવતાઃ ।
કેચિત્પ્રધાનં ત્રિગુણં સ્વતન્ત્રં કેવલં જડમ્ ॥ ૬॥

અણવઃ કેચિદિચ્છન્તિ શબ્દં કેચન મોહિતાઃ ।

ક્ષણપ્રધ્વંસિવિજ્ઞાનં કેચન ભ્રાન્તચેતસઃ ॥ ૭॥

શૂન્યસંજ્ઞં સુરાઃ કેચિન્નિરુપાખ્યં વિમોહિતાઃ ।
કેચિદ્ભૂતાનિ ચેચ્છન્તિ નિસર્ગં કેચન ભ્રમાત્ ॥ ૮॥

તત્ર તત્રૈવ તર્કાંશ્ચ પ્રવદન્તિ યથાબલમ્ ।
સર્વે વાદાઃ શ્રુતિસ્મૃત્યોર્વિરુદ્ધા ઇતિ મે મતિઃ ॥ ૯॥

પાપિષ્ઠાનાં તુ જન્તૂનાં તત્ર તત્ર સુરર્ષભાઃ ।
પ્રાક્સંસારવશાદેવ જાયતે રુચિરાસ્તિકાઃ ॥ ૧૦॥

તેઽપિ કાલવિપાકેન શ્રદ્ધયા પૂતયાઽપિ ચ ।
પુરાતનેન પુણ્યેન દેવતાનાં પ્રસાદતઃ ॥ ૧૧॥

કાલેન મહતા દેવાઃ સોપાનક્રમતઃ પુનઃ ।
વેદમાર્ગમિમં મુખ્યં પ્રાપ્નુવન્તિ ચિરન્તનમ્ ॥ ૧૨॥

પ્રાક્સંસારવશાદેવ યે વિચિન્ત્ય બલાબલે ।
વિવશા વેદમાપન્નાસ્તેઽપિ કૈવલ્યભાગિનઃ ॥ ૧૩॥

વેદમાર્ગમિમં મુક્ત્વા માર્ગમન્યં સમાશ્રિતઃ ।
હસ્તસ્થં પાયસં ત્યક્ત્વા લિહેત્કૂર્પરમાત્મનઃ ॥ ૧૪॥

વિદા વેદેન જન્તૂનાં મુક્તિર્માર્ગાન્તરેણ ચેત્ ।
તમસાઽપિ વિના લોકં તે પશ્યન્તિ ઘટાદિકમ્ ॥ ૧૫॥

તસ્માદ્વેદોદિતો હ્યર્થઃ સત્યં સત્યં મયોદિતમ્ ।
અન્યેન વેદિતો હ્યર્થો ન સત્યઃ પરમાર્થતઃ ॥ ૧૬॥

પરમાર્થો દ્વિધા પ્રોક્તો મયા હે સ્વર્ગવાસિનઃ ।
એકઃ સ્વભાવતઃ સાક્ષાત્પરમાર્થઃ સદૈવ તુ ॥ ૧૭॥

સ શિવઃ સત્યચૈતન્યસુખાનન્તસ્વલક્ષણઃ ।
અપરઃ કલ્પિતઃ સાક્ષાદ્બ્રહ્મણ્યધ્યસ્તમાયયા ॥ ૧૮॥

કલ્પિતાનામવસ્તૂનાં મધ્યે કેચન માયયા ।
પરમાર્થતયા ક્લૃપ્તાઃ વ્યવહારે સુરર્ષભાઃ ॥ ૧૯॥

વ્યવહારે તુ સઙ્ક્લૃપ્તાઃ કેચનાપરમાર્થતઃ ।
આકાશાદિ જગચ્છુક્તિરૂપે તે કથિતે મયા ॥ ૨૦॥

વ્યાવહારિકસત્યાર્થં સાક્ષાત્સત્યાર્થચિદ્ઘનમ્ ।
ઉભયં વક્તિ વેદસ્તુ માર્ગા નૈવં વદન્તિ હિ ॥ ૨૧॥

સ્વપ્નાવસ્થાસુ સઙ્ક્લૃપ્તસત્યાર્થેન સમાનિમાન્ ।
અર્થાનેવામનન્ત્યન્યે માર્ગા હે સ્વર્ગવાસિનઃ ॥ ૨૨॥

જાગ્રત્કાલે તુ સઙ્ક્લૃપ્તસત્યાર્થેન સમાનિમાન્ ।
માર્ગા એવામનન્ત્યર્થા કા કથા સત્યચિદ્ઘને ॥ ૨૩॥

તસ્માદેકૈકયા દૃષ્ટ્યા માર્ગાઃ સત્યાર્થભાષિણઃ ।
દૃષ્ટ્યાન્તરેણ તે ભ્રાન્તા ઇતિ સમ્યઙ્નિરૂપણમ્ ॥ ૨૪॥

ચૈતન્યાપેક્ષયા ચેત્યં વ્યોમાદિ સકલં જગત્ ।
અસત્યં સત્યરૂપં તત્કુમ્ભકુડ્યાદ્યપેક્ષયા ॥ ૨૫॥

કુમ્ભકુડ્યાદયો ભાવા અપિ વ્યોમાદ્યપેક્ષયા ।
અસત્યાઃ સત્યરૂપાસ્તે શુક્તિરૂપાદ્યપેક્ષયા ॥ ૨૬॥

જાગ્રદિત્યુદિતાવસ્થામપેક્ષ્ય સ્વપનાભિધા ।
અવસ્થાઽસત્યરૂપા હિ ન સત્યા હિ દિવૌકસઃ ॥ ૨૭॥

તથાઽપિ સ્વપ્નદૃષ્ટં તુ વસ્તુ સ્વર્ગનિવાસિનઃ ।
સૂચકં હિ ભવત્યેવ જાગ્રત્સત્યાર્થસિદ્ધયે ॥ ૨૮॥

તથૈવ માર્ગાઃ સુભ્રાન્તા અપિ વેદોદિતસ્ય તુ ।
અર્થસ્ય પ્રાપ્તિસિદ્ધ્યાર્થા ભવન્ત્યેવ ન સંશયઃ ॥ ૨૯॥

તસ્માદ્વેદેતરા માર્ગા નૈવ ત્યાજ્યા નિરૂપણે ।
વેદનિષ્ઠસ્તુ તાન્માર્ગાન્કદાચિદપિ ન સ્પૃશેત્ ॥ ૩૦॥

વેદનિષ્ઠસ્તુ માર્ગાંસ્તાન્મોહેનાપિ સ્પૃશેદ્યદિ ।
પ્રાયશ્ચિત્તી ભવત્યેવ નાત્ર કાર્યા વિચારણા ॥ ૩૧॥

એકસ્યામપિ તૈઃ સાર્ધં પઙ્ક્તૌ વેદૈકસંસ્થિતઃ ।
મોહેનાપિ ન ભુઞ્જીત ભુક્ત્વા ચાન્દ્રાયણં ચરેત્ ॥ ૩૨॥

ઇજ્યાદાનવિવાહાદિકાર્યમધ્યયનં શ્રુતેઃ ।
યદિ તૈર્મોહતઃ કુર્યાત્કુર્યાચ્ચાન્દ્રાયણત્રયમ્ ॥ ૩૩॥

ધર્માધર્માદિવિજ્ઞાનં નાદદીત શ્રુતૌ સ્થિતઃ ।
તેભ્યો મોહાદપિ પ્રાજ્ઞાઃ શ્રેયસ્કામી કદાચન ॥ ૩૪॥

વેદબાહ્યેષુ માર્ગેષુ સંસ્કૃતા યે નરાઃ સુરાઃ ।
તે હિ પાષણ્ડિનઃ સાક્ષાત્તથા તૈઃ સહવાસિનઃ ॥ ૩૫॥

કલૌ જગદ્વિધાતારં શિવં સત્યાદિલક્ષણમ્ ।
નાર્ચયિષ્યન્તિ વેદેન પાષણ્ડોપહતા જનાઃ ॥ ૩૬॥

વેદસિદ્ધં મહાદેવં સામ્બં ચન્દ્રાર્ધશેખરમ્ ।
નાર્ચયિષ્યન્તિ વેદેન પાષણ્ડોપહતા જનાઃ ॥ ૩૭॥

વેદોક્તેનૈવ માર્ગેણ ભસ્મનેવ ત્રિપુણ્ડ્રકમ્ ।
ધૂલનં નાચરિષ્યન્તિ પાષણ્ડોપહતા જનાઃ ॥ ૩૮॥

રુદ્રાક્ષધારણં ભક્ત્યા વેદોક્તેનૈવે વર્ત્મના ।
ન કરિષ્યન્તિ મોહેન પાષણ્ડોપહતા જનાઃ ॥ ૩૯॥

લિઙ્ગે દિને દિને દેવં શિવરુદ્રાદિસંજ્ઞિતમ્ ।
નાર્ચયિષ્યન્તિ વેદેન પાષણ્ડોપહતા જનાઃ ॥ ૪૦॥

દેવકાર્યં ન કુર્વન્તિ પિતૃકાર્યં વિશેષતઃ ।
ઔપાસનં ન કુર્વન્તિ પાષણ્ડોપહતા જનાઃ ॥ ૪૧॥

પઞ્ચયજ્ઞં ન કુર્વન્તિ તથૈવાતિથિપૂજનમ્ ।
વૈશ્વદેવં ન કુર્વન્તિ પાષણ્ડોપહતા જનાઃ ॥ ૪૨॥

વેદબાહ્યેન માર્ગેણ પૂજયન્તિ જનાર્દનમ્ ।
નિન્દન્તિ શઙ્કરં મોહાત્પાષણ્ડોપહતા જનાઃ ॥ ૪૩॥

બ્રહ્માણં કેશવં રુદ્રં ભેદભાવેન મોહિતાઃ ।
પશ્યન્ત્યેકં ન જાનન્તિ પાષણ્ડોપહતા જનાઃ ॥ ૪૪॥

અદક્ષિણમનભ્યઙ્ગમધૌતચરણં તથા ।
કુર્વન્ત્યનગ્નિકં શ્રાદ્ધં પાષણ્ડોપહતા જનાઃ ॥ ૪૫॥

એકાદશ્યામથાષ્ટમ્યાં ચતુર્દશ્યાં વિશેષતઃ ।
ઉપવાસં ન કુર્વન્તિ પાષણ્ડોપહતા જનાઃ ॥ ૪૬॥

શતરુદ્રીયચમકૈસ્તથા પૌરુષસૂક્તકૈઃ ।
નાભિષિઞ્ચન્તિ દેવેશં પાષણ્ડોપહતા જનાઃ ॥ ૪૭॥

ચિરન્તનાનિ સ્થાનાનિ શિવસ્ય પરમાત્મનઃ ।

ન દ્રક્ષ્યન્તિ મહાભક્ત્યા પાષણ્ડોપહતા જનાઃ ॥ ૪૮॥

શ્રીમદ્દક્ષિણકૈલાસે વર્તનં શ્રદ્ધયા સહ ।
વત્સરં ન કરિષ્યન્તિ પાષણ્ડોપહતા જનાઃ ॥ ૪૯॥

શ્રીમદ્વ્યાઘ્રપુરે પુણ્યે વર્તનં ભુક્તિમુક્તિદમ્ ।
વત્સરં ન કરિષ્યન્તિ પાષણ્ડોપહતા જનાઃ ॥ ૫૦॥

અન્યેષુ ચ વિશિષ્ટેષુ શિવસ્થાનેષુ વર્તનમ્ ।
વત્સરં ન કરિષ્યન્તિ પાષણ્ડોપહતા જનાઃ ॥ ૫૧॥

દિને દિને તુ વેદાન્તમહાવાક્યાર્થનિર્ણયમ્ ।
આચાર્યાન્ન કરિષ્યન્તિ પાષણ્ડોપહતા જનાઃ ॥ ૫૨॥

સન્ન્યાસં પરહંસાખ્યં નાઙ્ગીકુર્વન્તિ મોહિતાઃ ।
પ્રદ્વેષં ચ કરિષ્યન્તિ પાષણ્ડોપહતા જનાઃ ॥ ૫૩॥

અન્યાનિ યાનિ કર્માણિ વેદેનૈવોદિતાનિ તુ ।
નાચરિષ્યન્તિ તાન્યેવ પાષણ્ડોપહતા જનાઃ ॥ ૫૪॥

સ્માર્તાન્યપિ ચ કર્માણિ યાનિ યાનિ સુરોત્તમાઃ ।
નાચરિષ્યન્તિ તાન્યેવ પાષણ્ડોપહતા જનાઃ ॥ ૫૫॥

ઊર્ધ્વપુણ્ડ્રં લલાટે તુ વર્તુલં ચાર્ધચન્દ્રકમ્ ।
ધારયિષ્યન્તિ મોહેન પાષણ્ડોપહતા જનાઃ ॥ ૫૬॥

શઙ્ખચક્રગદાવજ્રૈરઙ્કનં વિગ્રહે સ્વકે ।
મોહેનૈવ કરિષ્યન્તિ પાષણ્ડોપહતા જનાઃ ॥ ૫૭॥

મનુષ્યાણાં ચ નામ્ના તુ તેષામાકારતોઽપિ ચ ।
લાઞ્છિતાશ્ચ ભવિષ્યન્તિ પાષણ્ડોપહતા જનાઃ ॥ ૫૮॥

બહુનોક્તેન કિં વેદમર્યાદાભેદનં સુરાઃ ।
શ્રદ્ધયૈવ કરિષ્યન્તિ પાષણ્ડોપહતા જનાઃ ॥ ૫૯॥

ધીરા વિશિષ્ટાશ્ચ મહેશ્વરસ્ય
    પ્રસાદયુક્તાશ્ચ મહત્તમાશ્ચ ।
વેદોદિતં કેવલમેવ દેવા
    મુદા કરિષ્યન્તિ વિમુક્તિસિદ્ધ્યૈ ॥ ૬૦॥

ઇતિ બ્રહ્મગીતાસૂપનિષત્સુ

વેદાર્થવિચારો નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

---

॥ અથ તૃતીયોઽધ્યાયઃ ॥

॥ સાક્ષિશિવસ્વરૂપકથનમ્ ॥

બ્રહ્મોવાચ -
સર્વાત્મા શઙ્કરો નામ સાક્ષ્યેવ સકલસ્ય તુ ।
સાક્ષ્યભાવે જગત્સાક્ષ્યં કથં ભાતિ સુરોત્તમાઃ ॥ ૧॥

સ્વતો ભાનવિહીનં હિ જગત્સર્વં ચરાચરમ્ ।
જડતાઽજડતા ચાસ્ય જગતો ભાનવત્તયા ॥ ૨॥

ભાનં વિજ્ઞાનતો જન્યમિતિ કૈશ્ચિદુદીર્યતે ।
તન્ન સઙ્ગતમેવ સ્યાજ્જન્યં ચેજ્જડમેવ તત્ ।
જડાનામેવ જન્યત્વં કુમ્ભાદીનાં હિ સમ્મતમ્ ॥ ૩॥

વિજ્ઞાનં ચાપિ ભાનસ્ય નૈવોત્પાદકમિષ્યતે ।
જ્ઞાનસ્ય ભાનરૂપેણ પરિણામો ન સિધ્યતિ ॥ ૪॥

અવિક્રિયત્વાજ્જ્ઞાનસ્ય યદિ તસ્યાપિ વિક્રિયા ।
તર્હિ ક્ષીરાદિવચ્ચેત્યં ભવેત્તન્નૈવ વેદનમ્ ॥ ૫॥

તથા ભાનસ્ય વિજ્ઞાનં નૈવારમ્ભકમિષ્યતે ।
અદ્રવ્યત્વાદ્ગુણત્વેન પરૈરઙ્ગીકૃતત્વતઃ ॥ ૬॥

અસદ્રૂપસ્ય ભાનસ્ય જ્ઞાનં નારમ્ભકં ભવેત્ ।
વન્ધ્યાસૂનોરપિ જ્ઞાનં તદા હ્યારમ્ભકં ભવેત્ ॥ ૭॥

પ્રાગસદ્રૂપભાનસ્ય જ્ઞાનં નારમ્ભકં ભવેત્ ।
અસતઃ પ્રાક્ત્વપૂર્વાણાં વિશેષાણામભાવતઃ ॥ ૮॥

અતો વિજ્ઞાનજન્યત્વં નાસ્તિ ભાનસ્ય સર્વદા ॥ ૯॥

જ્ઞાનસ્યાપિ ન જન્યત્વમસ્તિ હે સ્વર્ગવાસિનઃ ।
ઉક્તન્યાયેન જન્યત્વપ્રતીતિર્ભ્રાન્તિરેવ હિ ॥ ૧૦॥

ભાનસ્યાપિ તથા ભ્રાન્તિર્જન્યત્વપ્રતિભા સુરાઃ ।
ભાવત્વે સત્યજન્યત્વાદ્ભાનં નિત્યં સુરોત્તમાઃ ॥ ૧૧॥

યજ્જગદ્ભાસકં ભાનં નિત્યં ભાતિ સ્વતઃ સુરાઃ ।
સ એવ જગતઃ સાક્ષી સર્વાત્મા શઙ્કરાભિધઃ ॥ ૧૨॥

તેન કલ્પિતસમ્બન્ધાદજ્ઞાનં ભાતિ ન સ્વતઃ ।
અજ્ઞાનજન્યં ચિત્તં ચ રાગદ્વેષાદયસ્તથા ।
અજ્ઞાનસ્પૃષ્ટચૈતન્યાદેવં ભાન્તિ ન ચ સ્વતઃ ॥ ૧૩॥

પ્રાણશ્ચાપિ તથા બાહ્યકરણાનિ વપુસ્તથા ।
ચિત્તવૃત્ત્યભિસમ્બન્ધદ્વારેણૈવ દૃગન્વયાત્ ॥ ૧૪॥

વિભાન્તિ ન સ્વતો બાહ્યવિષયાશ્ચ તથૈવ ચ ॥ ૧૫॥

અનુમાનાદિવૃત્તિસ્થં ચૈતન્યં સુરસત્તમાઃ ।
અર્થાનામપિ કેષાં ચિદ્ભાસકં તેન શઙ્કરઃ ॥ ૧૬॥

સર્વાવભાસકઃ પ્રોક્તસ્તેન ભાતમિદં જગત્ ।
અતો રૂપાણિ તેનૈવ પશ્યતીશેન માનવઃ ॥ ૧૭॥

શ ृણોત્યનેન શબ્દાંશ્ચ ગન્ધાનાજિઘ્રતિ પ્રિયાન્ ।
અનેનૈવ સદા વાચં વ્યાકરોતિ તુ માનવઃ ।
અનેન સ્વાદુ ચાસ્વાદુ વિજાનાતિ ચ માનવઃ ॥ ૧૮॥

શઙ્કરાખ્યં તુ વિજ્ઞાનં બહુધા શબ્દ્યતે બુધૈઃ ।
કેચિદ્ધૃદયમિત્યાહુર્બ્રાહ્મણા હે સુરોત્તમાઃ ॥ ૧૯॥

મન ઇત્યપરે સન્તઃ સંજ્ઞાનમિતિ કેચન ।
આજ્ઞાનમિતિ વિદ્વાંસઃ કેચિદ્ધે સ્વર્ગવાસિનઃ ॥ ૨૦॥

વિજ્ઞાનમિતિ ચાપ્યન્યે પ્રજ્ઞાનમિતિ કેચન ।
મેધેતિ બ્રાહ્મણાઃ કેચિદ્દૃષ્ટિરિત્યપરે બુધાઃ ॥ ૨૧॥

ધૃતિરિત્યપરે પ્રાજ્ઞા મતિરિત્યપિ કેચન ।
મનીષેતિ મહાપ્રાજ્ઞા જૂતિરિત્યપરે બુધાઃ ॥ ૨૨॥

સ્મૃતિરિત્યાસ્તિકાઃ કેચિત્સઙ્કલ્પ ઇતિ કેચન ।
ક્રતુરિત્યપરે પ્રાજ્ઞાઃ કામ ઇત્યપરે જનાઃ ॥ ૨૩॥

વશ ઇત્યાસ્તિકાઃ કેચિત્સર્વાણ્યેતાનિ સન્તતમ્ ।
પ્રજ્ઞાનસ્ય શિવસ્યાસ્ય નામધ્યેયાન્યસંશયમ્ ॥ ૨૪॥

એષ બ્રહ્મૈષ એવેન્દ્ર એષ એવ પ્રજાપતિઃ ।

એષ એવ હિ દેવાશ્ચ ભૂતાનિ ભવનાનિ ચ ॥ ૨૫॥

અણ્ડજા જારુજાશ્ચૈવ સ્વેદજા ઉદ્ભિજા અપિ ।
અશ્વા ગાવશ્ચ મર્ત્યાશ્ચ હસ્તિપૂર્વાસ્તથૈવ ચ ॥ ૨૬॥

સ્થાવરં જઙ્ગમં ચૈવ તથાઽન્યદપિ કિઞ્ચન ।
સર્વમેતદયં શમ્ભુઃ પ્રજ્ઞાનઘનલક્ષણઃ ॥ ૨૭॥

પ્રતિષ્ઠા સર્વવસ્તૂનાં પ્રજ્ઞૈષા પારમેશ્વરી ।
પ્રજ્ઞાનમેવ તદ્બ્રહ્મ શિવરુદ્રાદિ સંજ્ઞિતમ્ ॥ ૨૮॥

એવંરૂપપરિજ્ઞાનાદેવ મર્ત્યોઽમૃતો ભવેત્ ।
ન કર્મણા ન પ્રજયા ન ચાન્યેનાપિ કેનચિત્ ॥ ૨૯॥

બ્રહ્મવેદનમાત્રેણ બ્રહ્માપ્નોત્યેવ માનવઃ ।
અત્ર નાસ્ત્યેવ સન્દેહસ્ત્રિર્વઃ શપથયામ્યહમ્ ॥ ૩૦॥

તદ્વિદ્યાવિષયં બ્રહ્મ સત્યજ્ઞાનસુખાદ્વયમ્ ।
સંસારકે ગુહાવાચ્યે માયાજ્ઞાનાદિસંજ્ઞિતે ।
નિહિતં બ્રહ્મ યો વેદ પરમવ્યોમસંજ્ઞિતે ॥ ૩૧॥

સોઽશ્નુતે સકલાન્કામાનક્રમેણ સુરર્ષભાઃ ।
વિદિતબ્રહ્મરૂપેણ જીવન્મુક્તો ન સંશયઃ ॥ ૩૨॥

પ્રત્યગજ્ઞાનવિજ્ઞાનમાયાશક્તેસ્તુ સાક્ષિણમ્ ।
એકં બ્રહ્મ ચ સમ્પશ્યન્સાક્ષાદ્બ્રહ્મવિદુત્તમઃ ॥ ૩૩॥

બ્રહ્મરૂપાત્મનસ્તસ્માદેતસ્માચ્છક્તિમિશ્રિતાત્ ।
અપઞ્ચીકૃત આકાશઃ સમ્ભૂતો રજ્જુસર્પવત્ ॥ ૩૪॥

આકાશાદ્વાયુસઞ્જ્ઞસ્તુ સ્પર્શોઽપઞ્ચીકૃતઃ પુનઃ ।
વાયોરગ્નિસ્તથા ચાગ્નેરાપ અદ્ભ્યો વસુન્ધરા ॥ ૩૫॥

તાનિ ભૂતાનિ સૂક્ષ્માણિ પઞ્ચીકૃત્ય શિવાજ્ઞયા ।
તેભ્ય એવ સુરા સૃષ્ટં બ્રહ્માણ્ડાખ્યમિદં મયા ॥ ૩૬॥

ભુવનાનિ વિશિષ્ટાનિ નિર્મિતાનિ શિવાજ્ઞયા ।
બ્રહ્માણ્ડસ્યોદરે દેવા દેવાશ્ચ વિવિધા અમી ॥ ૩૭॥

દેવાદયો મનુષ્યાશ્ચ તથા પશ્વાદયો જનાઃ ।
તત્તત્કર્માનુરૂપેણ મયા સૃષ્ટાઃ શિવાજ્ઞયા ॥ ૩૮॥

અસ્થિસ્નાય્વાદિરૂપં યચ્છરીરં ભાતિ દેહિનામ્ ।
તસ્માત્પ્રાણમયો હ્યાત્મા વિભિન્નશ્ચાન્તરો યતઃ ॥ ૩૯ ॥

યોઽયં પ્રાણમયો હ્યાત્મા ભાતિ સર્વશરીરિણામ્ ।
તતો મનોમયો હ્યાત્મા વિભિન્નશ્ચાન્તરત્વતઃ ॥ ૪૦ ॥

યોઽયં મનોમયો હ્યાત્મા ભાતિ સર્વશરીરિણામ્ ।
વિજ્ઞાનમય આત્મા ચ તતોઽન્યશ્ચાન્તરો યતઃ ॥ ૪૧ ॥

વિજ્ઞાનમય આત્મા યો વિભાતિ સકલાત્મનામ્ ।
આનન્દમય આત્મા ચ  તતોઽન્યશ્ચાન્તરો યતઃ ॥ ૪૨ ॥

યોઽયમન્નમયઃ સોઽયં પૂર્ણઃ પ્રાણમયેન તુ ।
મનોમયેન પ્રાણોઽપિ તથા પૂર્ણઃ સ્વભાવતઃ ॥ ૪૩ ॥

તથા મનોમયો હ્યાત્મા પૂર્ણો જ્ઞાનમયેન તુ ।
આનન્દેન સદા પૂર્ણસ્તથા જ્ઞાનમયઃ સુરાઃ ॥ ૪૪ ॥

તથાઽઽનન્દમયશ્ચાપિ બ્રહ્મણાઽન્યેન સાક્ષિણા ।
સર્વાન્તરેણ સમ્પૂર્ણો બ્રહ્મ નાન્યેન કેનચિત્ ॥ ૪૫ ॥

યદિદં બ્રહ્મ પુચ્છાખ્યં સત્યજ્ઞાનાદ્વયાત્મકમ્ ।
સ રસઃ સર્વદા સાક્ષાન્નાન્યથા સુરપુઙ્ગવાઃ ॥ ૪૬ ॥

એતમેવ રસં સાક્ષાલ્લબ્ધ્વા દેહી સનાતનમ્ ।
સુખી ભવતિ સર્વત્ર નાન્યથા સુરસત્તમાઃ ॥ ૪૭ ॥

અસત્યસ્મિન્પરાનન્દે સ્વાત્મભૂતેઽખિલાત્મનામ્ ।
કો જીવતિ નરો દેવાઃ કો વા નિત્યં વિચેષ્ટતે ॥ ૪૮ ॥

તસ્માત્સર્વાત્મનાં ચિત્તે ભાસમાનો રસો હરઃ ।
આનન્દયતિ દુઃખાઢ્યં જીવાત્માનં કૃપાબલાત્ ॥ ૪૯ ॥

યદા હ્યેવૈષ એતસ્મિન્નદૃશ્યત્વાદિલક્ષણે ।
નિર્ભેદં પરમેકત્વં વિન્દતે સુરસત્તમાઃ ॥ ૫૦ ॥

તદૈવાભયમત્યન્તં કલ્યાણં પરમામૃતમ્ ।
સ્વાત્મભૂતં પરં બ્રહ્મ સ યાતિ સ્વર્ગવાસિનઃ ॥ ૫૧ ॥

યદા હ્યેવૈષ એતસ્મિન્નલ્પમત્યન્તરં નરઃ ।

વિજાનાતિ તદા તસ્ય ભયં સ્યાન્નાત્ર સંશયઃ ॥ ૫૨॥

સર્વેષામાત્મભૂતં યદ્બ્રહ્મ સત્યાદિલક્ષણમ્ ।
ઉદાસ્તે તત્સુરશ્રેષ્ઠા યથાજાતજનં પ્રતિ ॥ ૫૩॥

સમ્યગ્જ્ઞાનૈકનિષ્ઠાનાં તદેવ પરમં પદમ્ ।
તદા સ્વાત્મતયા ભાતિ કેવલં કૃપયા સુરાઃ ॥ ૫૪॥

તત્ત્વેવાધીતવેદસ્ય સહાઙ્ગૈઃ સુરપુઙ્ગવાઃ ।
મનનેન વિહીનસ્ય ભયહેતુઃ સદા ભવેત્ ॥ ૫૫॥

ભીષાઽસ્માત્પવતે વાયુર્ભીષોદેતિ દિવાકરઃ ।
ભીષાઽસ્માદગ્નિરિન્દ્રશ્ચ મૃત્યુર્ધાવતિ પઞ્ચમઃ ॥ ૫૬॥

અસ્યૈવાનન્દલેશેન સ્તમ્બાન્તા વિષ્ણુપૂર્વકાઃ ।
ભવન્તિ સુખિનો દેવાસ્તારતમ્યક્રમેણ તુ ॥ ૫૭॥

તત્તત્પદવિરક્તસ્ય શ્રોત્રિયસ્ય પ્રસાદિનઃ ।
સ્વરૂપભૂત આનન્દઃ સ્વયં ભાતિ પદે યથા ॥ ૫૮॥

અયમેવ શિવઃ સાક્ષાદાદિત્યહૃદયે તથા ।
અન્યેષાં હૃદયે ચૈવ ભાતિ સાક્ષિતયા સ્વયમ્ ॥ ૫૯॥

વિહાય સાક્ષ્યં દેહાદિ માયાન્તં તુ વિવેકતઃ ।
સર્વસાક્ષિણમાત્માનં યઃ પશ્યતિ સ પશ્યતિ ॥ ૬૦॥

રુદ્રનારાયણાદીનાં સ્તમ્બાન્તાનાં ચ સાક્ષિણમ્ ।
એવં તર્કપ્રમાણાભ્યાં યઃ પશ્યતિ સ પશ્યતિ ॥ ૬૧॥

યસ્યૈવં તર્કમાનાભ્યામસ્તિ વિજ્ઞાનમાસ્તિકાઃ ।
સ લોકાદખિલાદસ્માદ્વિભિદ્યાત્માનમાત્મના ॥ ૬૨॥

અન્નાદીનખિલાન્કોશાનાભાસેન વિભાસિતાન્ ।
ઉપસઙ્ક્રામતીશસ્ય પ્રસાદાદેવ કેવલાત્ ॥ ૬૩॥

યતો વાચો નિવર્તન્તે નિમિત્તાનામભાવતઃ ।
નિર્વિશેષે શિવે શબ્દઃ કથં દેવાઃ પ્રવર્તતે ॥ ૬૪॥

વિશેષં કઞ્ચિદાશ્રિત્ય ખલુ શબ્દઃ પ્રવર્તતે ।
યસ્માદેતન્મનઃ સૂક્ષ્માં વ્યાવૃત્તં સર્વગોચરમ્ ॥ ૬૫॥

યસ્માચ્છ્રોત્રત્વગક્ષ્યાદિખાનિ કર્મેન્દ્રિયાણિ ચ ।
વ્યાવૃત્તાનિ પરાગ્વસ્તુવિષયાણિ સુરોત્તમાઃ ॥ ૬૬॥

તદ્બ્રહ્માનન્દમદ્વન્દ્વં નિર્ગુણં સત્યચિદ્ઘનમ્ ।
વિદિત્વા સ્વાત્મરૂપેણ ન બિભેતિ કુતશ્ચન ॥ ૬૭॥

એવં યસ્તુ વિજાનાતિ સ્વગુરોરુપદેશતઃ ।
સ સાધ્વસાધુકર્મભ્યાં સદા ન તપતિ પ્રભુઃ ॥ ૬૮॥

તપ્યતાપકરૂપેણ વિભાતમખિલં જગત્ ।
પ્રત્યગાત્મતયા ભાતિ જ્ઞાનાદ્વેદાન્તવાક્યજાત્ ॥ ૬૯॥

કર્તા કારયિતા કર્મ કરણં કાર્યમાસ્તિકઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પરમેશ્વરાત્ ॥ ૭૦॥

પ્રમાતા ચ પ્રમાણં ચ પ્રમેયં પ્રમિતિસ્તથા ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૭૧॥

નિયોજ્યશ્ચ નિયોગશ્ચ સાધનાનિ નિયોજકઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૭૨॥

ભોક્તા ભોજયિતા ભોગો ભોગોપકરણાનિ ચ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૭૩॥

ગ્રાહકશ્ચ તથા ગ્રાહ્યં ગ્રહણં સર્વતોમુખમ્ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૭૪॥

અન્યથાજ્ઞાનમજ્ઞાનં સંશયજ્ઞાનમેવ ચ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૭૫॥

ઘટજ્ઞાનં પટજ્ઞાનં કુડ્યાદિજ્ઞાનમેવ ચ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૭૬॥

ઘટઃ કુડ્યં કુસૂલં ચ પટઃ પાત્રં ચ પર્વતઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૭૭॥

પાતાલાદ્યાશ્ચ લોકાશ્ચ સત્યલોકાદયોઽપિ ચ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૭૮॥

બ્રહ્માણ્ડં તત્ર ક્લૃપ્તાનામણ્ડાનાં શતકોટયઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૭૯॥

સમુદ્રાશ્ચ તટાકાશ્ચ નદ્યઃ સર્વનદા અપિ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૮૦॥

મેરુમન્દારપૂર્વાશ્ચ પર્વતાશ્ચ મહત્તરાઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૮૧॥

વનાનિ વનદેશાશ્ચ વન્યાનિ વિવિધાનિ ચ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૮૨॥

વૃક્ષાશ્ચ વિવિધાઃ ક્ષુદ્રતૃણગુલ્માદયોઽપિ ચ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૮૩॥

આકાશાદીનિ ભૂતાનિ ભૌતિકાન્યખિલાન્યપિ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૮૪॥

શબ્દસ્પર્શાદિતન્માત્રરૂપાણિ સકલાનિ ચ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૮૫॥

કૃમિકીટપતઙ્ગાશ્ચ ક્ષુદ્રા અપિ ચ જન્તવઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૮૬॥

પશવશ્ચ મૃગાશ્ચૈવ પન્નગાઃ પાપયોનયઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૮૭॥

મનુષ્યાશ્ચૈવ માતઙ્ગા અશ્વા ઉષ્ટ્રાઃ ખરા અપિ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૮૮॥

યક્ષરાક્ષસગન્ધર્વપ્રમુખાઃ સિદ્ધકિન્નરાઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૮૯॥

કર્મદેવાશ્ચ દેવાશ્ચ દેવરાજો વિરાટ્ સ્વરાટ્ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૯૦॥

અહં ચ મદ્વિભૂતિશ્ચ વિષ્ણુભક્તાશ્ચ દેહિનઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૯૧॥

વિષ્ણુર્વિષ્ણુવિભૂતિશ્ચ વિષ્ણુભક્તાશ્ચ દેહિનઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૯૨॥

રુદ્રો રુદ્રવિભૂતિશ્ચ રુદ્રભક્તાશ્ચ દેહિનઃ ।

સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૯૩॥

ઈશ્વરસ્તદ્વિભૂતિશ્ચ તદીયાઃ સર્વદેહિનઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૯૪॥

સદાશિવસમાખ્યસ્તુ શિવસ્તસ્ય વિભૂતયઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૯૫॥

દિશશ્ચ વિદિશશ્ચૈવ સાભ્રં નક્ષત્રમણ્ડલમ્ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૯૬॥

વાસુદેવઃ સઙ્કર્ષણઃ પ્રદ્યુમ્નશ્ચાનિરુદ્ધકઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૯૭॥

મત્સ્યઃ કૂર્મો વરાહશ્ચ નારસિંહોઽથ વામનઃ ।
તદ્ભક્તાશ્ચ તથા ભાન્તિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૯૮॥

આશ્રમાશ્ચ તથા વર્ણાઃ સઙ્કરા વિવિધા અપિ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૯૯॥

નિષિદ્ધં ચાનિષિદ્ધં ચ નિષેધા વિધયોઽપિ ચ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૧૦૦॥

શરીરમિન્દ્રિયં પ્રાણો મનો બુદ્ધિરહઙ્કૃતિઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૧૦૧॥

કામક્રોધાદયઃ સર્વે તથા શાન્ત્યાદયોઽપિ ચ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૧૦૨॥

જીવાત્મા પરમાત્મા ચ તયોર્ભેદશ્ચ ભેદકઃ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૧૦૩॥

જડશક્તિપ્રભેદાશ્ચ ચિચ્છક્તિસ્તદ્ભિદાઽપિ ચ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૧૦૪॥

અસ્તિશબ્દોદિતા અર્થા નાસ્તિશબ્દોદિતા અપિ ।
સર્વમાત્મતયા ભાતિ પ્રસાદાત્પારમેશ્વરાત્ ॥ ૧૦૫॥

આત્મા નામ સુરાઃ સ્વેન ભાસા યો ભાતિ સન્તતમ્ ।
તમેવ ત્વમહંશબ્દપ્રત્યયાભ્યાં તુ જન્તવઃ ॥ ૧૦૬॥

વ્યવહારે વિજાનન્તિ ન જાનન્ત્યેવ તેઽર્થતઃ ।
અર્થતશ્ચાસ્ય વેત્તારો ન વિદ્યન્તેઽદ્વયત્વતઃ ॥ ૧૦૭॥

એવમાત્માનમદ્વૈતમાત્મના વેદ યઃ સ્થિરમ્ ।
સોઽયમર્થમિમં નિત્યં ગાયન્નાસ્તે સ્વભાવતઃ ॥ ૧૦૮॥

યથા નર્તનમીશસ્ય સ્વભાવાલ્લોકરક્ષકમ્ ।
તથા વિદ્યા વિનોદાખ્યા ગીતિર્લોકોપકારિણી ॥ ૧૦૯॥

યથૈવાદિગુરોર્ગીતિર્લોકાનાં હિતકારિણી ।
તથૈવાસ્ય ગુરોર્ગીતિર્લોકાનાં હિતકામ્યયા ॥ ૧૧૦॥

આપ્તકામસ્ય રુદ્રસ્ય ગીતિર્વ્યાખ્યાનલક્ષણા ।
પરોપકારિણી તદ્વદ્ગીતિરસ્યાપિ સદ્ગુરોઃ ॥ ૧૧૧॥

લૌકિકેષ્વપિ ગાનેષુ પ્રસાદં કુરુતે શિવઃ ।
કિં પુનર્વૈદિકે ગાને તતો ગાનં સમાશ્રયેત્ ॥ ૧૧૨॥

વ્યાખ્યાગાનેષ્વશક્તસ્તુ શિવમુદ્દિશ્ય ભક્તિતઃ ।
લૌકિકીમપિ વા ગીતિં કુર્યાન્નિત્યમતન્દ્રિતઃ ॥ ૧૧૩॥

ગીતિજ્ઞાનં શિવપ્રાપ્તેઃ સુતરાં કારણં ભવેત્ ।
ગીતિજ્ઞાનેન યોગઃ સ્યાદ્યોગાદેવ શિવૈક્યતા ॥ ૧૧૪॥

ગીતિજ્ઞો યદિ યોગેન ન યાતિ પરમેશ્વરમ્ ।
પ્રતિબન્ધકબાહુલ્યાત્તસ્યૈવાનુચરો ભવેત્ ॥ ૧૧૫॥

કેવલં લૌકિકં ગાનં ન કુર્યાન્મોહતોઽપિ વા ।
યદિ કુર્યાત્પ્રમાદેન પ્રાયશ્ચિત્તી ભવેદ્દ્વિજઃ ॥ ૧૧૬॥

અતસ્તુ સંસારવિનાશને રતઃ
    શ્રુતિપ્રમાણેન ચ તર્કવર્ત્મના ।
પ્રબોધમાસાદ્ય શિવસ્ય તં પુનઃ
    સદૈવ ગાયન્વિચરેદિમાં મહીમ્ ॥ ૧૧૭॥

ઇત્યુપનિષત્પરતત્ત્વવિષયા વઃ
    સત્યમુદિતા સકલદુઃખનિહન્ત્રી ।
કષ્ટહૃદયસ્ય મનુજસ્ય ન દેયા
    ભક્તિસહિતસ્ય તુ શિવસ્ય ખલુ દેયા ॥ ૧૧૮॥

ઇતિ બ્રહ્મગીતાસૂપનિષત્સુ
સાક્ષિશિવસ્વરૂપકથનં નામ તૃતીયોઽધ્યાયઃ ॥ ૩॥

---

॥ અથ ચતુર્થોઽધ્યાયઃ ॥

॥ તલવકારોપનિષદ્વ્યાખ્યાકથનમ્ ॥

બ્રહ્મોવાચ -
અસ્તિ દેવઃ સ્વતઃ સિદ્ધઃ સાક્ષી સર્વસ્ય સર્વદા ।
સંસારાર્ણવમગ્નાનાં સાક્ષાત્સંસારમોચકઃ ॥ ૧॥

સર્વેષાં તુ મનસ્તેન પ્રેરિતં નિયમેન તુ ।
વિષયે ગચ્છતિ પ્રાણશ્ચેષ્ટતે વાગ્વદત્યપિ ॥ ૨॥

ચક્ષુઃ પશ્યતિ રૂપાણિ શ્રોત્રં શબ્દં શ‍ૃણોત્યપિ ।
અન્યાનિ ખાનિ સર્વાણિ તેનૈવ પ્રેરિતાનિ તુ ॥ ૩॥

સ્વં સ્વં વિષયમુદ્દિશ્ય પ્રવર્તન્તે નિરન્તરમ્ ।
પ્રવર્તકત્વં ચાપ્યસ્ય માયયા ન સ્વભાવતઃ ॥ ૪॥

ઇન્દ્રિયાણાં તુ સત્તા ચ નૈવ સ્વાભાવિકી મતા ।
તત્માયઃ પિણ્ડવત્તસ્ય સત્ત્યયૈવ સુરર્ષભાઃ ॥ ૫॥

શ્રોત્રમાત્મનિ ચાધ્યસ્તં સ્વયં દેવો મહેશ્વરઃ ।
અનુપ્રવિશ્ય શ્રોત્રસ્ય દદાતિ શ્રોત્રતાં હરઃ ॥ ૬॥

મન આત્મનિ ચાધ્યસ્તં પ્રવિશ્ય પરમેશ્વરઃ ।
મનસ્ત્વં તસ્ય સત્ત્વસ્થો દદાતિ નિયમેન તુ ॥ ૭॥

વાચો વાક્ત્વમનુપ્રાપ્ય પ્રાણસ્ય પ્રણતાં હરઃ ।
દદાતિ નિયમેનૈવ ચક્ષુષ્ટ્વં ચક્ષુષસ્તથા ॥ ૮॥

અન્યેષામિન્દ્રિયાણાં તુ કલ્પિતાનામપીશ્વરઃ ।
તત્તદ્રૂપમનુપ્રાપ્ય દદાતિ નિયમેન તુ ॥ ૯॥

તત્ર ચક્ષુશ્ચ વાક્ચૈવ મનશ્ચાન્યાનિ ખાનિ ચ ।
ન ગચ્છન્તિ સ્વયઞ્જ્યોતિઃસ્વભાવે પરમાત્મનિ ॥ ૧૦॥

સ દેવો વિદિતાદન્યસ્તથૈવાવિદિતાદપિ।
વાચા ચ મનસા ચૈવ ચક્ષુષા ચ તથૈવ ચ ॥ ૧૧॥

શ્રોત્રેણાપિ સુરશ્રેષ્ઠાઃ પ્રાણેનાન્યેન કેનચિત્ ।
ન શક્યો ગોચરીકર્તું સત્યમેવ મયોદિતમ્ ॥ ૧૨॥

યસ્યેદમખિલં નિત્યં ગોચરં રૂપવદ્રવેઃ ।
તદેવ પરમં બ્રહ્મ વિત્ત યૂયં સનાતનમ્ ॥ ૧૩॥

એવં જાનન્તિ યે ધીરાસ્તર્કતશ્ચ પ્રમાણતઃ ।
ગુરૂક્ત્યા સ્વાનુભૂત્યા ચ ભવન્તિ ખલુ તેઽમૃતાઃ ॥ ૧૪॥

સુજ્ઞાતમિતિ તદ્બ્રહ્મ મનુધ્વં યદિ હે સુરાઃ ।
દભ્રમેવ હિ તત્સાક્ષિ બ્રહ્મ વેદ્યં કથં ભવેત્ ॥ ૧૫॥

યસ્ય સ્વાત્મતયા બ્રહ્મ વિદિતં કર્મતાં વિના ।
તસ્ય તજ્જ્ઞાનકર્તૃત્વવિહીનસ્ય મતં હિ તત્ ॥ ૧૬॥

યસ્યામતં તસ્ય મતં મતં યસ્ય ન વેદ સઃ ।
અવિજ્ઞાતં વિજાનતાં વિજ્ઞાતમવિજાનતામ્ ॥ ૧૭॥

બ્રહ્મજ્ઞાને ઘટજ્ઞાને ભ્રાન્તિજ્ઞાનેઽપિ ચાસ્તિકાઃ ।
નૈવ કર્તૃ ન કર્માપિ બ્રહ્મ ચિત્કેવલં ભવેત્ ॥ ૧૮॥

યસ્ય કર્તૃતયા ભાતં બ્રહ્માકર્તૃ સુરોત્તમાઃ ।
તસ્ય બ્રહ્મામતં યસ્માત્કર્મ તસ્ય મતં હિ તત્ ॥ ૧૯॥

યસ્ય કર્મતયા ભાતં બ્રહ્માકર્મ સુરોત્તમાઃ ।
તસ્ય બ્રહ્મામતં યસ્માત્કર્મ તસ્ય મતં હિ તત્ ॥ ૨૦॥

અકર્ત્રવિષયપ્રત્યક્પ્રકાશઃ સ્વાત્મનૈવ તુ ।
વિના તર્કપ્રમાણાભ્યાં બ્રહ્મ યો વેદ વેદ સઃ ॥ ૨૧॥

એવંરૂપપરિજ્ઞાનમપિ દૃશ્યતયૈવ તુ ।
યસ્ય ભાતિ સ તત્સાક્ષી બ્રૂત બ્રહ્માત્મવિત્કથમ્ ॥ ૨૨॥

બ્રહ્માવિદ્યાઽપિ જ્ઞાતા ચેદ્વેદ્યા ભવતિ કુમ્ભવત્ ।
અવેદ્યં બ્રહ્મ વેદ્યં સ્યાદ્વેદ્યવિદ્યાભિસઙ્ગમાત્ ॥ ૨૩॥

વેત્તાઽપિ વિદ્યાસમ્બન્ધાત્સવિશેષો ભવેદ્ધ્રુવમ્ ।
નિર્વિશેષં પરં બ્રહ્મ તતો વિદ્વાન્ન ચાત્મવિત્ ॥ ૨૪॥

વિદ્યાયા આશ્રયત્વેન વિષયત્વેન વા ભવેત્ ।

બ્રહ્મ નૈવાન્યથા તત્ર બ્રહ્મ બ્રહ્મ ભવેત્કથમ્ ॥ ૨૫॥

બ્રહ્મસમ્બન્ધહીના ચેદ્વિદ્યા બ્રહ્મ તુ વેદિતુમ્ ।
અશક્યં તત્ર હે દેવાઃ કો વા બ્રહ્માત્મવિદ્ભવેત્ ॥ ૨૬॥

બ્રહ્મણ્યધ્યસ્તમાયાદિનિવૃત્તિં કુરુતે તુ સા ।
વિદ્યા યદિ ન માયાયાઃ પ્રત્યગાત્મન્યસમ્ભવાત્ ॥ ૨૭॥

પ્રત્યગાત્મા પરં જ્યોતિર્માયા સા તુ મહત્તમઃ ।
તથા સતિ કથં માયાસમ્ભવઃ પ્રત્યગાત્મનિ ॥ ૨૮॥

તસ્માત્તર્કપ્રમાણાભ્યાં સ્વાનુભૂત્યા ચ ચિદ્ઘને ।
સ્વપ્રકાશૈકસંસિદ્ધેર્નાસ્તિ માયા પરાત્મનિ ॥ ૨૯॥

વ્યાવહારિકદૃષ્ટ્યેયં વિદ્યાઽવિદ્યા ન ચાન્યથા ।
તત્ત્વદૃષ્ટ્યા તુ નાસ્ત્યેવ તત્ત્વમેવાસ્તિ કેવલમ્ ॥ ૩૦॥

વ્યાવહારિકદૃષ્ટિસ્તુ પ્રકાશાવ્યભિચારતઃ ।
પ્રકાશ એવ સતતં તસ્માદદ્વૈતમેવ હિ ॥ ૩૧॥

અદ્વૈતમિતિ ચોક્તિશ્ચ પ્રકાશાવ્યભિચારતઃ ।
પ્રકાશ એવ સતતં તસ્માન્મૌનં હિ યુજ્યતે ॥ ૩૨॥

પ્રત્યક્ષાદિ પ્રમાણૈશ્ચ તર્કૈઃ શ્રુત્યા તથૈવ ચ ।
સ્વગુરોરુપદેશેન પ્રસાદેન શિવસ્ય તુ ॥ ૩૩॥

અર્જિતૈરપિ ધર્મૈશ્ચ કાલપાકેન ધાર્મિકાઃ ।
અર્થો મહાનયં ભાતિ શાઙ્કરઃ પુરુષસ્ય તુ ॥ ૩૪॥

યસ્ય પ્રકાશિતઃ સાક્ષાદયમર્થો મહત્તરઃ ।
તસ્ય નાસ્તિ ક્રિયાઃ સર્વા જ્ઞાનં ચાપ્યદ્વયત્વતઃ ॥ ૩૫॥

અયમર્થો મહાન્યસ્ય સ્વત એવ પ્રકાશિતઃ ।
ન સ જીવો ન ચ બ્રહ્મ ન ચાન્યદપિ કિઞ્ચન ॥ ૩૬॥

અયમર્થો મહાન્યસ્ય સ્વત એવ પ્રકાશિતઃ ।
ન તસ્ય વર્ણા વિદ્યન્તે નાશ્રમાશ્ચ તથૈવ ચ ॥ ૩૭॥

અયમર્થો મહાન્યસ્ય સ્વત એવ પ્રકાશિતઃ ।
ન તસ્ય ધર્મોઽધર્મશ્ચ ન નિષેધો વિધિર્ન ચ ॥ ૩૮॥

એતમર્થં મહાન્તં યઃ પ્રાપ્તઃ શમ્ભોઃ પ્રસાદતઃ ।
સ શમ્ભુરેવ નૈવાન્ય ઇતિ મે નિશ્ચિતા મતિઃ ॥ ૩૯॥

એતમર્થં મહાન્તં યઃ પ્રાપ્તઃ શમ્ભોઃ પ્રસાદતઃ ।
તસ્યાહં વૈભવં વક્તું ન શક્તઃ સત્યમીરિતમ્ ॥ ૪૦॥

એતમર્થં મહાન્તં યઃ પ્રાપ્તઃ શમ્ભોઃ પ્રસાદતઃ ।
વૈભવં તસ્ય વિષ્ણુશ્ચ ન શક્તો વક્તુમાસ્તિકાઃ ॥ ૪૧॥

એતમર્થં મહાન્તં યઃ પ્રાપ્તઃ શમ્ભોઃ પ્રસાદતઃ ।
વૈભવં તસ્ય રુદ્રશ્ચ ન શક્તો વક્તુમાસ્તિકાઃ ॥ ૪૨॥

એતમર્થં મહાન્તં યઃ પ્રાપ્તઃ શમ્ભોઃ પ્રસાદતઃ ।
વૈભવં તસ્ય વેદાશ્ચ ન શક્તા વક્તુમાસ્તિકાઃ ॥ ૪૩॥

અસ્મિન્દેહે યદિ જ્ઞાતઃ પુરોક્તોઽર્થોમહાનયમ્ ।
સ સાક્ષાત્સત્યમદ્વૈતં નિર્વાણં યાતિ માનવઃ ॥ ૪૪॥

અસ્મિન્દેહે ન વિજ્ઞાતઃ પુરોક્તોઽર્થો મહાન્યદિ ।
વિનષ્ટિરેવ મહતી તસ્ય નૈવ પરા ગતિઃ ॥ ૪૫॥

સ્વશરીરેઽન્યદેહેષુ સમં નિશ્ચિત્ય તં દૃઢમ્ ।
અથ ધીરા ન જાયન્તે હ્યમૃતાશ્ચ ભવન્તિ હિ ॥ ૪૬॥

બદ્ધો મુક્તો મહાવિદ્વાનજ્ઞ ઇત્યાદિભેદતઃ ।
એક એવ સદા ભાતિ નાનેવ સ્વપ્નવત્સ્વયમ્ ॥ ૪૭॥

અતઃ સ્વમુક્ત્યૈવાન્યેષામાભાસાનામપિ ધ્રુવમ્ ।
મુક્તિં જાનાતિ હે દેવા આત્મનામાત્મવિદ્વરઃ ॥ ૪૮॥

સ્વસંસારદશાયાં તુ સ્વભ્રાન્ત્યા સર્વદેહિનામ્ ।
આભાસાનાં ચ સંસારં વેદ મુક્તિં તથૈવ ચ ॥ ૪૯॥

પ્રારબ્ધકર્મપર્યન્તં કદાચિત્પરમાત્મવિત્ ।
જગજ્જીવાદિકં વેદ કદાચિન્નૈવ વેદ તત્ ॥ ૫૦॥

કદાચિદ્બ્રહ્મ જાનાતિ પ્રતીતમખિલં સુરાઃ ।
કદાચિન્નૈવ જાનાતિ સ્વભાવાદેવ તત્ત્વવિત્ ॥ ૫૧॥

જગજ્જીવાદિરૂપેણ યદા બ્રહ્મ વિભાસતે ।
તદા દુઃખાદિભોગોઽપિ ભાતિ ચાભાસરૂપતઃ ॥ ૫૨॥

યદા બ્રહ્માત્મના સર્વં વિભાતિ સ્વત એવ તુ ।
તદા દુઃખાદિભોગોઽયમાભાસો ન વિભાસતે ॥ ૫૩॥

જગજ્જીવાદિરૂપેણ પશ્યન્નપિ પરાત્મવિત્ ।
ન તત્પશ્યતિ તદ્રૂપં બ્રહ્મવસ્ત્વેવ પશ્યતિ ॥ ૫૪॥

બ્રહ્મણોઽન્યત્સદા નાસ્તિ વસ્તુતોઽવસ્તુતોઽપિ ચ ।
તથા સતિ શિવાદન્યત્કથં પશ્યતિ તત્ત્વવિત્ ॥ ૫૫॥

બ્રહ્મરૂપેણ વા સાક્ષાજ્જગજ્જીવાત્મનાઽથવા ।
યથા યથા પ્રથા સાક્ષાદ્બ્રહ્મ ભાતિ તથા તથા ॥ ૫૬॥

યથા યથાઽવભાસોઽયં સ્વભાવાદેવ ભાસતે ।
તથા તથાઽનુસન્ધાનં યોગિનઃ સ્વાત્મવેદનમ્ ॥ ૫૭॥

નામતશ્ચાર્થતશ્ચાપિ મહાદેવો યદિ પ્રભુઃ ।
કિં જહાતિ તદા વિદ્વાન્કિં ગૃહ્ણાતિ સુરર્ષભાઃ ॥ ૫૮॥

ગ્રાહ્યં વા શઙ્કરાદન્યત્ત્યાજ્યં વા યદિ વિદ્યતે ।
મહત્ત્વં તસ્ય હીયેત સ્વભાવો ન વિહન્યતે ॥ ૫૯॥

મહત્ત્વં નૈવ ધર્મોઽસ્ય ભેદાભાવાત્પરાત્મનઃ ।
ધર્મધર્મિત્વવાર્તા ચ ભેદે સતિ હિ વિદ્યતે ॥ ૬૦॥

ભેદોઽભેદસ્તથા ભેદાભેદઃ સાક્ષાત્પરાત્મના ।
નાસ્તિ સ્વાત્માતિરેકેણ સ્વયમેવાસ્તિ સર્વદા ॥ ૬૧॥

બ્રહ્મૈવ વિદ્યતે સાક્ષાદ્વસ્તુતોઽવસ્તુતોઽપિ ચ ।
તથા સતિ શિવજ્ઞાની કિં ગૃહ્ણાતિ જહાતિ કિમ્ ॥ ૬૨॥

માયયા વિદ્યતે સર્વમિતિ કેચન મોહિતાઃ ।
શિવરૂપાતિરેકેણ નાસ્તિ માયા ચ વસ્તુતઃ ॥ ૬૩॥

માયયા વા શિવાદન્યદ્વિદ્યતે ચેચ્છિવસ્ય તુ ।
મહત્ત્વં પરમં સાક્ષાદ્ધીયતે સુરપુઙ્ગવાઃ ॥ ૬૪॥

મહત્ત્વસ્ય તુ સઙ્કોચો નાસ્તિ સમ્યઙ્નિરૂપણે ।
અસ્તિ ચેદપ્રમાણં સ્યાચ્છ્રુતિઃ સત્યાર્થવાદિની ॥ ૬૫॥

તસ્માદસ્તિ મહાદેવ એવ સાક્ષાત્સ્વયમ્પ્રભુઃ ।

આનન્દરૂપઃ સમ્પૂર્ણો ન તતોઽન્યત્તુ કિઞ્ચન ॥ ૬૬॥

ઇયમેવ તુ તર્કાણાં નિષ્ઠાકાષ્ઠા સુરોત્તમાઃ ।
પ્રત્યક્ષાદિપ્રમાણાનાં વેદાન્તાનામપીશ્વરાઃ ॥ ૬૭॥

સ્મૃતીનાં ચ પુરાણાનાં ભારતસ્ય તથૈવ ચ ।
વેદાનુસારિવિદ્યાનામન્યાસામાસ્તિકોત્તમાઃ ॥ ૬૮॥

શૈવાગમાનાં સર્વેષાં વિષ્ણુપ્રોક્તાગમસ્ય ચ ।
અસ્મદુક્તાગમસ્યાપિ સુરાઃ સૂક્ષ્મનિરૂપણે ॥ ૬૯॥

બુદ્ધાગમાનાં સર્વેષાં તથૈવાર્હાગમસ્ય ચ ।
યક્ષગન્ધર્વસિદ્ધાદિનિર્મિતસ્યાગમસ્ય ચ ॥ ૭૦॥

પરમાદ્વૈતવિજ્ઞાનં કસ્ય મર્ત્યસ્ય સિધ્યતિ ।
કસ્ય દેવસ્ય વા સાક્ષાચ્છિવસ્યૈવ હિ સિધ્યતિ ॥ ૭૧॥

પરમાદ્વૈતવિજ્ઞાનં શિવસ્યામિતતેજસઃ ।
સ્વભાવસિદ્ધં દેવ્યાશ્ચ શિવાયા આસ્તિકોત્તમાઃ ॥ ૭૨॥

પ્રસાદાદેવ રુદ્રસ્ય શિવાયાશ્ચ તથૈવ ચ ।
પરમાદ્વૈતવિજ્ઞાનં વિષ્ણોઃ સાક્ષાન્મમાપિ ચ ॥ ૭૩॥

વિરાટ્સઞ્જ્ઞસ્ય દેવસ્ય સ્વરાટ્સઞ્જ્ઞસ્ય ચાત્મનઃ ।
સમ્રાટ્સઞ્જ્ઞસ્ય ચાન્યેષાં પ્રસાદાએવ વેદનમ્ ॥ ૭૪॥

યુષ્માકમપિ સર્વેષાં શિવસ્ય પરમાત્મનઃ ।
પરમાદ્વૈતવિજ્ઞાનં પ્રસાદાદેવ નાન્યથા ॥ ૭૫॥

યક્ષરાક્ષસગન્ધર્વસિદ્ધાદીનામપીશ્વરાઃ ।
પરમાદ્વૈતવિજ્ઞાનં પ્રસાદાદેવ શૂલિનઃ ॥ ૭૬॥

મનુષ્યાણાં ચ સર્વેષાં પશ્વાદીનાં તથૈવ ચ ।
પરમાદ્વૈતવિજ્ઞાનં પ્રસાદાદેવ શૂલિનઃ ॥ ૭૭॥

પ્રસાદે સતિ કીટો વા પતઙ્ગો વા નરોઽથ વા ।
દેવો વા દાનવો વાઽપિ લભતે જ્ઞાનમુત્તમમ્ ॥ ૭૮॥

એષ એવ હિ જન્તૂનાં પરજ્ઞાનં દદાતિ ચ ।
ન વિષ્ણુર્નાહમન્યશ્ચ સત્યમેવ મયોદિતમ્ ॥ ૭૯॥

આદાને ચ તથા દાને ન સ્વતન્ત્રો મહાન્ હરિઃ ।
તથૈવાહં સુરશ્રેષ્ઠાઃ સત્યમેવ મયોદિતમ્ ॥ ૮૦॥

સ્વતન્ત્રઃ શિવ એવાયં સ હિ સંસારમોચકઃ ।
તં વિના ન મયોદ્ધર્તું શક્યતે સંસૃતેર્જનઃ ॥ ૮૧॥

વિષ્ણુના ચ પરેણાપિ મહાદેવં ઘૃણાનિધિમ્ ।
વિના જન્તું સમુદ્ધર્તું શક્યતે ન હિ સત્તમાઃ ॥ ૮૨॥

દર્વીન્યાયેન સંસારાદુદ્ધરામિ જનાનિમાન્ ।
ન સ્વાતન્ત્ર્યેણ હે દેવાઃ સાક્ષાદ્વિષ્ણુસ્તથૈવ ચ ॥ ૮૩॥

દેવદેવસ્ય રુદ્રસ્ય સ્વરૂપં તસ્ય વૈભવમ્ ।
કો વા જાનાતિ નાસ્ત્યેવ સ્વયં જાનાતિ વા ન વા ॥ ૮૪॥

દુર્વિજ્ઞેયો મહાદેવો મહતામપિ દેહિનામ્ ।
પ્રસાદેન વિના દેવાઃ સત્યમેવ મયોદિતમ્ ॥ ૮૫॥

પુરા સુરાણાં સર્વેષામસુરાણાં દુરાત્મનામ્ ।
મહામોહેન સઙ્ગ્રામઃ સઞ્જાતો દુર્નિવારકઃ ॥ ૮૬॥

અસુરૈઃ પીડિતા દેવા બલવદ્ભિઃ સુરા ભૃશમ્ ।
તાન્દૃષ્ટ્વા ભગવાનીશઃ સર્વજ્ઞઃ કરુણાકરઃ ॥ ૮૭॥

દેવાનાં વિજયં દેવા અસુરાણાં પરાજયમ્ ।
દદૌ તેન સુરૈઃ શીઘ્રમસુરાસ્તુ પરાજિતાઃ ॥ ૮૮॥

અવિજ્ઞાય મહાદેવવૈભવં પરિમોહિતાઃ ।
વયં વિજયમાપન્ના અસુરાશ્ચ પરાજિતાઃ ॥ ૮૯॥

ઇત્યહમ્માનસઞ્છન્નાઃ સર્વે દેવાઃ પુરાતનાઃ ।
અતીવ પ્રીતિમાપન્ના અભવન્સુરપુઙ્ગવાઃ ॥ ૯૦॥

પુનર્વિશ્વાધિકો રુદ્રો ભગવાન્કરુણાનિધિઃ ।
સ્વસ્ય દર્શયિતું તેષાં દુર્જ્ઞેયત્વં તથૈવ ચ ॥ ૯૧॥

તેષાં ભ્રાન્તિનિવૃત્ત્યર્થમપિ સાક્ષાન્મહેશ્વરઃ ।
આવિર્બભૂવ સર્વજ્ઞો યક્ષરૂપેણ હે સુરાઃ ॥ ૯૨॥

તં દૃષ્ટ્વા યક્ષમત્યન્તં વિસ્મયેન સહામરાઃ ।
વિચાર્ય સર્વે સમ્ભૂય કિમિદં યક્ષમિત્યપિ ॥ ૯૩॥

પુનરગ્નિં સમાહૂય દેવાઃ સર્વે વિમોહિતાઃ ।
અબ્રુવંસ્ત્વં વિજાનીહિ કિમેતદ્યક્ષમિત્યપિ ॥ ૯૪॥

અગ્નિસ્તથા કરોમીતિ પ્રોચ્ય યક્ષં ગતોઽભવત્ ।
યક્ષરૂપો મહાદેવઃ કોઽસીત્યાહાનલં પ્રતિ ॥ ૯૫॥

અગ્નિર્વા અહમસ્મીતિ યક્ષં પ્રત્યાહ સોઽપિ ચ ।
સોઽપિ પ્રોવાચ ભગવાંસ્ત્વયિ કિં વીર્યમિત્યપિ ॥ ૯૬॥

ઇદં સર્વં દહેયં યદિદં ભૂમ્યાં વ્યવસ્થિતમ્ ।
ઇત્યાહાગ્નિસ્તૃણં તસ્મૈ નિધાય પરમેશ્વરઃ ॥ ૯૭॥

એતદ્દહેતિ ભગવાન્સ્મયમાનોઽભ્યભાષત ।
અગ્નિઃ સર્વજવેનૈવ તદ્દગ્ધું તૃણમાસ્તિકાઃ ॥ ૯૮॥

અશક્તો લજ્જયા યુક્તો ભીતોઽગચ્છત્સુરાન્પ્રતિ ।
માયા તસ્યૈવ વિજ્ઞાતું ન શક્યં વૈભવં સુરાઃ ॥ ૯૯॥

વિત્ત યૂયં મહાયાસાદિત્યાહાગ્નિઃ સુરાન્પ્રતિ ।
તચ્છ્રુત્વા વાયુમાહૂય વિજાનીહીતિ ચાબ્રુવન્ ॥ ૧૦૦॥

સોઽપિ ગત્વા તથા તેન યક્ષરૂપેણ શમ્ભુના ।
ભૃશં પ્રતિહતો ભૂત્વા તથાઽગચ્છત્સુરાન્પ્રતિ ॥ ૧૦૧॥

પુનરિન્દ્રઃ સ્વયં મોહાદહન્તાકઞ્ચુકાવૃતઃ ।
વિજ્ઞાતું યક્ષમગમત્સ તત્રૈવ તિરોદધે ॥ ૧૦૨॥

ઇન્દ્રોઽતીવ વિષણ્ણસ્તુ મહાતાપસમન્વિતઃ ।
વિદ્યારૂપામુમાં દેવીં ધ્યાત્વા કારુણિકોત્તમામ્ ॥ ૧૦૩॥

લૌકિકૈર્વૈદિકૈઃ સ્તોત્રૈસ્તુષ્ટાવ પરમેશ્વરીમ્ ।
સા શિવા કરુણામૂર્તિર્જગન્માતા ત્રયીમયી ॥ ૧૦૪॥

શિવાભિન્ના પરાનન્દા શઙ્કરસ્યાપિ શઙ્કરી ।
સ્વેચ્છયા હિમવત્પુત્રી સ્વભક્તજનવત્સલા ॥ ૧૦૫॥

મહાદેવસ્ય માહાત્મ્યં દુર્જ્ઞેયં સર્વજન્તુભિઃ ।
ઇતિ દર્શયિતું દેવી તત્રૈવાવિરભૂત્સ્વયમ્ ॥ ૧૦૬॥

તામારાધ્ય શિવામિન્દ્રઃ શોભમાનાં તુ સર્વતઃ ।

ઉમાં પર્વતરાજેન્દ્રકન્યકામાહ વજ્રભૃત્ ॥ ૧૦૭॥

કિમેતદ્યક્ષમત્રૈવ પ્રાદુર્ભૂતં તિરોહિતમ્ ।
વક્તુમર્હસિ દેવેશિ મમ કારુણિકોત્તમે ॥ ૧૦૮॥

દેવી પરમકારુણ્યાદ્બ્રહ્મ મે પતિરત્ર તુ ।
પ્રાદુર્ભૂતં તિરોભૂતમિત્યાહાદેષનાયિકા ॥ ૧૦૯॥

દુર્વિજ્ઞેયો મહાદેવો વિષ્ણોઃ સાક્ષાદજસ્ય ચ ।
અન્યેષામપિ દેવાનાં તવાપિ મઘવન્ભૃશમ્ ॥ ૧૧૦॥

પ્રદર્શયિતુમીશાનો દુર્જ્ઞેયત્વં સ્વકં પરમ્ ।
આવિર્ભૂતો ન ચાન્યેન કારણેન સુરાધિપ ॥ ૧૧૧॥

સ એવ સર્વદેવાનાં તવાપિ વિજયપ્રદઃ ।
પરાજયકરોઽન્યેષાં તમેવ શરણં વ્રજ ॥ ૧૧૨॥

ઇત્યુક્ત્વા સા મહાદેવી ચિદ્રૂપા સર્વસાક્ષિણી ।
ભક્તાનાં પાશહન્ત્રી તુ તત્રૈવાન્તર્હિતાઽભવત્ ॥ ૧૧૩॥

પુનર્દેવા મહાદેવં મહાકારુણિકોત્તમમ્ ।
દુર્વિજ્ઞેયં સુરશ્રેષ્ઠાઃ સ્વતન્ત્રં ભક્તિમુક્તિદમ્ । ભુક્તિમુક્તિદમ્?
વિદુઃ સુનિશ્ચિતં ત્યક્ત્વા માત્સર્યં ભવકારણમ્ ॥ ૧૧૪॥

પ્રસાદે સતિ વિજ્ઞાતું શક્યતે પરમેશ્વરઃ ।
પ્રસાદેન વિના નૈવ શક્યતે સર્વજન્તુભિઃ ॥ ૧૧૫॥

પ્રસાદેન વિના વિષ્ણુર્ન જાનાતિ મહેશ્વરમ્ ।
તથા ચાહં ન જાનામિ દેવતાઃ સકલા અપિ ॥ ૧૧૬॥

પ્રસાદસ્ય તુ સિદ્ધ્યર્થં ખલુ સર્વં સુરર્ષભાઃ ।
પ્રસાદેન વિના દેવં યે જાનન્તિ સુરર્ષભાઃ ॥ ૧૧૭॥

તે જાનન્તિ વિના ઘ્રાણં ગન્ધં હસ્તેન કેવલમ્ ।
પ્રસાદો નામ રુદ્રસ્ય કર્મસામ્યે તુ દેહિનામ્ ॥ ૧૧૮॥

દેશિકાલોકનાજ્જાતો વિશિષ્ટાતિશયઃ સુરાઃ ।
પ્રસાદસ્ય સ્વરૂપં તુ મયા નારાયણેન ચ ॥ ૧૧૯॥

રુદ્રેણાપિ સુરા વક્તું ન શક્યં કલ્પકોટિભિઃ ।
કેવલં લિઙ્ગગમ્યં તુ ન પ્રત્યક્ષં શિવસ્ય ચ ॥ ૧૨૦॥

શિવાયાશ્ચ હરેઃ સાક્ષાન્મમ ચાન્યસ્ય ચાસ્તિકાઃ ।
પ્રહર્ષઃ સ્વરનેત્રાઙ્ગવિક્રિયા કમ્પનં તથા ॥ ૧૨૧॥

સ્તોભઃ શરીરપાતશ્ચ ભ્રમણં ચોદ્ગતિસ્તથા ।
આકાશેઽવસ્થિતિર્દેવાઃ શરીરાન્તરસંસ્થિતિઃ ॥ ૧૨૨॥

અદર્શનં ચ દેહસ્ય પ્રકાશત્વેન ભાસનમ્ ।
અનધીતસ્ય શાસ્ત્રસ્ય સ્વત એવ પ્રકાશનમ્ ॥ ૧૨૩॥

નિગ્રહાનુગ્રહે શક્તિઃ પર્વતાદેશ્ચ ભેદનમ્ ।
એવમાદીનિ લિઙ્ગાનિ પ્રસાદસ્ય સુરર્ષભાઃ ॥ ૧૨૪॥

તીવ્રાત્તીવ્રતરઃ શમ્ભોઃ પ્રસાદો ન સમો ભવેત્ ।
એવંરૂપઃ પ્રસાદશ્ચ શિવયા ચ શિવેન ચ ॥ ૧૨૫॥

જ્ઞાયતે ન મયા નાન્યૈર્નૈવ નારાયણેન ચ ।
અતઃ સર્વં પરિત્યજ્ય શિવાદન્યત્તુ દૈવતમ્ ॥ ૧૨૬॥

તમેવ શરણં ગચ્છેત્સદ્યો મુક્તિં યદીચ્છતિ ।
વિષ્ણુભક્ત્યા ચ મદ્ભક્ત્યા નાસ્તિ નાસ્તિ પરા ગતિઃ ॥ ૧૨૭॥

શમ્ભુભક્ત્યૈવ સર્વેષાં સત્યમેવ મયોદિતમ્ ।
શમ્ભુભક્તસ્ય દેહેઽસ્મિન્પ્રસાદો ગમ્યતે યથા ॥ ૧૨૮॥

ન તથા વિષ્ણુભક્તસ્ય ન મદ્ભક્તસ્ય દેહિનઃ ।
તસ્માન્મુમુક્ષુર્માં વિષ્ણુમપિ ત્યક્ત્વા મહેશ્વરમ્ ॥ ૧૨૯॥

આશ્રયેત્સર્વભાવેન પ્રસાદં કુરુતે હિ સઃ ।
પ્રસાદે સતિ દેવેશો દુર્જ્ઞેયોઽપિ સુરર્ષભાઃ ॥ ૧૩૦॥

શક્યતે મનુજૈર્દ્રષ્ટું પ્રત્યગાત્મતયા સદા ।
પ્રસાદે સતિ દેવેશો દુર્જ્ઞેયોઽપિ સુરર્ષભાઃ ॥ ૧૩૧॥

શક્યતે મનુજૈર્દ્રષ્ટું સદા મૂર્ત્યાત્મનૈવ તુ ।
પ્રસાદે સતિ દેવેશો દુર્જ્ઞેયોઽપિ સુરર્ષભાઃ ॥ ૧૩૨॥

શક્યતે મનુજૈર્દ્રષ્ટું સદા સર્વાત્મરૂપતઃ ।
સર્વસાક્ષિણમાત્માનં વિદિત્વા સકલં જગત્ ॥ ૧૩૩॥

સાક્ષિમાત્રતયા નિત્યં યઃ પશ્યતિ સ પશ્યતિ ।

પરમાદ્વૈતનિષ્ઠા હિ નિષ્ઠાકાષ્ઠા સુદુર્લભા ॥ ૧૩૪॥

શિવાદન્યતયા ભ્રાન્ત્યા દ્વૈતં વા વેદ ચેત્પશુઃ ।
પરમાદ્વૈતવિજ્ઞાની સ્વયં તુ પરદેવતા ॥ ૧૩૫॥

તસ્યૈવ પરમા મુક્તિર્ન હિ સંશયકારણમ્ ।
ગૌતમસ્ય મુનેઃ શાપાદ્દધીચસ્ય ચ શાપતઃ ॥ ૧૩૬॥

જન્માન્તરકૃતાત્પાપાદયમર્થો ન રોચતે ।
મહાપાપવતાં નૃણાં પરમાદ્વૈતવેદને ॥ ૧૩૭॥

પ્રદ્વેષો જાયતે સાક્ષાદ્વેદજન્યે શિવેઽપિ ચ ।
મહાપાવતાં નૃણાં શિવજ્ઞાનસ્ય સાધને ॥ ૧૩૮॥

સર્વાઙ્ગોદ્ધૂલને તિર્યક્ત્રિપુણ્ડ્રસ્ય ચ ધારણે ।
રુદ્રાક્ષધારણે રુદ્રલિઙ્ગસ્યૈવ તુ પૂજને ॥ ૧૩૯॥

પ્રદ્વેષો જાયતે નિત્યં શિવશબ્દજપેઽપિ ચ ।
અનેકજન્મસિદ્ધાનાં શ્રૌતસ્માર્તાનુવર્તિનામ્ ॥ ૧૪૦॥

પરમાદ્વૈતવિજ્ઞાનં જાયતે સુરપુઙ્ગવાઃ ।
પરમાદ્વૈતવિજ્ઞાની મયાઽઽરાધ્યઃ સદૈવ તુ ॥ ૧૪૧॥

નારાયણેન રુદ્રેણ તથા દેવૈર્વિશેષતઃ ।
પરમાદ્વૈતવિજ્ઞાની યત્ર કુત્ર સ્થિતઃ સુરાઃ ॥ ૧૪૨॥

તત્ર સન્નિહિતા મુક્તિર્નાત્ર કાર્યા વિચારણા ।
પરમાદ્વૈતવિજ્ઞાનનિષ્ઠસ્યૈવ મહાત્મનઃ ॥ ૧૪૩॥

શુશ્રૂષા ક્રિયતે યેન તત્પાદૌ મમ મસ્તકે ।
પરમાદ્વૈતવિજ્ઞાનનિષ્ઠસ્ય પરયોગિનઃ ॥ ૧૪૪॥

સમં દેવા ન પશ્યામિ ન હરિર્ન મહેશ્વરઃ ।
પરમાદ્વૈતવિજ્ઞાનનિષ્ઠાય પરયોગિને ॥ ૧૪૫॥

શરીરમર્થં પ્રાણાંશ્ચ પ્રદદ્યાચ્છ્રદ્ધયા સહ ।
પરમાદ્વૈતવિજ્ઞાનનિષ્ઠસ્ય પરયોગિનઃ ॥ ૧૪૬॥

શુશ્રૂષા શુદ્ધવિદ્યાયાઃ સાધનં હિ ન સંશયઃ ।
વેદબાહ્યેષુ તન્ત્રેષુ નરાણાં વાસનાઽપિ ચ ॥ ૧૪૭॥

કુતર્કવાસના લોકવાસના ચ સુરર્ષભાઃ ।
પુત્રમિત્રકલત્રાદૌ વાસના ચાર્થવાસના ॥ ૧૪૮॥

દેહેન્દ્રિયમનોબુદ્ધિપ્રાણાદાવપિ વાસના ।
પાણ્ડિત્યવાસના ભોગવાસના કાન્તિવાસના  ॥ ૧૪૯॥

પ્રદ્વેષવાસના રુદ્રવેદનારાયણાદિષુ ।
જ્ઞાનસાધનભૂતેષુ ત્રિપુણ્ડ્રોદ્ધુલનાદિષુ ॥ ૧૫૦॥

પ્રદ્વેષવાસના પાપવાસના સુરપુઙ્ગવાઃ ।
પરમાદ્વૈતવિજ્ઞાનજન્મનઃ પ્રતિબન્ધકમ્ ॥ ૧૫૧॥

તસ્માન્મુમુક્ષુઃ શ્રદ્ધાલુર્વાસનામખિલામિમામ્ ।
વિસૃજ્ય પરમાદ્વૈતજ્ઞાનનિષ્ઠો ભવેત્સદા ॥ ૧૫૨॥

વેદોદિતમહાદ્વૈતપરિજ્ઞાનસ્ય વૈભવમ્ ।
ન શક્યં વક્તુમસ્માભિસ્તસ્માદેવોપરમ્યતે ॥ ૧૫૩॥

કથિતમખિલદુઃખધ્વંસકં વઃ સમસ્તં
    પરમસુખશિવાત્મપ્રાપકં સદ્ય એવ ।
વિગતસકલદોષા વેદવેદાન્તનિષ્ઠા
    હૃદયકુહરનિષ્ઠં કર્તુમર્હન્તિ ચૈતત્ ॥ ૧૫૪॥

ઇતિ બ્રહ્મગીતાસૂપનિષત્સુ
તલવકારોપનિષદ્વ્યાખ્યાકથનં
નામ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

---

॥ અથ પઞ્ચમોઽધ્યાયઃ ॥

॥ આદેશકથનમ્ ॥

બ્રહ્મોવાચ ।
અતીવગુહ્યમાદેશમનન્તાર્થપ્રકાશકમ્ ।
વક્ષ્યે યુષ્માકમદ્યાહં શ◌ૃણુત શ્રદ્ધયા સહ ॥ ૧॥

યસ્ય શ્રવણમાત્રેણ શ્રુતમેવાશ્રુતં ભવેત્ ।
અમતં ચ મતં જ્ઞાતમવિજ્ઞાતં ચ સત્તમાઃ ॥ ૨॥

એકેનૈવ તુ પિણ્ડેન મૃત્તિકાયા યથા સુરાઃ ।

વિજ્ઞાતં મૃણ્મયં સર્વં મૃદભિન્નત્વતઃ સદા ॥ ૩॥

એકેન લોહમણિના સર્વં લોહમયં યથા ।
વિજ્ઞાતં સ્યાદ્યથૈકેન નખાનાં કૃન્તનેન ચ ॥ ૪॥

સર્વં કાર્ષ્ણાયસં જ્ઞાતં તદભિન્નત્વતઃ સુરાઃ ।
કાર્યં તુ કારણાભિન્નં ન ભિન્નં નોભયાત્મકમ્ ॥ ૫॥

ભિન્નપક્ષે તુ સદ્વાઽસત્કાર્યં સદસદેવ વા ।
સચ્ચેત્કારણસત્તા વા કાર્યસત્તાઽથવા પરા ॥ ૬॥

યદિ કારણસત્તૈવ કાર્યસત્તા ન ચાપરા ।
તર્હિ કારણસત્તૈકા કથં સત્તાભિદા ભવેત્ ॥ ૭॥

સત્તૈકાઽપિ ભવેદ્ભિન્નં કારણાત્કાર્યસઞ્જ્ઞિતમ્ ।
ઇતિ વાર્તા ચ વાર્તૈવ કાર્યસઞ્જ્ઞમસત્ખલુ ॥ ૮॥

સત્તાહીનસ્ય કાર્યસ્યાસત્ત્વમેવ હિ યુજ્યતે ।
પ્રાપ્તેઽસત્ત્વે તુ કાર્યસ્ય સત્કાર્યોક્તિર્વૃથા ભવેત્ ॥ ૯॥

નૈવ કારણસત્તૈવ કાર્યસત્તાઽપરૈવ ચેત્ ।
તર્હિ સા કાર્યસત્તા તુ તયા કારણસત્તયા ॥ ૧૦॥

સદ્રૂપેણૈવ ભિન્ના સ્યાદસદ્રૂપેણ વા ભવેત્ ।
સદ્રૂપેણેતિ ચેદેકા સત્તા ભિન્ના ન સા ભવેત્ ॥ ૧૧॥

અસદ્રૂપેણ સા ભિન્ના કાર્યસત્તા તયા યદિ ।
તર્હિ સા નૈવ સત્તા સ્યાદસત્ત્વાદેવ શૂન્યવત્ ॥ ૧૨॥

યદ્યસત્કાર્યમિષ્યેત ન કાર્યં તર્હિ તદ્ભવેત્ ।
વન્ધ્યાપુત્રો ન કસ્યાપિ વસ્તુનઃ કાર્યમિષ્યતે ॥ ૧૩॥

પ્રધ્વંસોઽપિ ન કાર્યં સ્યાત્તસ્યોત્પત્તેરસમ્ભવાત્ ।
નાસ્તિ કારકસમ્બન્ધઃ પ્રધ્વંસસ્ય સુરોત્તમાઃ ।
શૂન્યવન્નિરુપાખ્યત્વાત્તતો નાસ્તિ જનિક્રિયા ॥ ૧૪॥

અસત્ત્વેઽપિ વિશેષોઽસ્તિ કાર્યસ્યેતિ મતિર્યદિ ॥ ૧૫॥

કો વિશેષોઽસ્ય સમ્બન્ધઃ કારકૈર્યદિ તન્ન હિ ।
વિશેષે સતિ સમ્બન્ધઃ સમ્બન્ધોઽસ્ય સ એવ હિ ॥ ૧૬॥

જનિક્રિયાશ્રયત્વં ચેદ્વિશેષોઽસ્ય તદાઽપિ તુ ।
પૂર્વોક્તદોષઃ સમ્પ્રાપ્તસ્તસ્ય નાસ્તિ નિવારકઃ ॥ ૧૭॥

સત્તાસમ્બન્ધવત્ત્વં ચેદ્વિશેષોઽસ્ય ન તત્પટુ ।
તદાઽપિ દોષઃ પૂર્વોક્તઃ પ્રાપ્નોત્યેવ ન સંશયઃ ॥ ૧૮॥

અતોઽસતો ન કાર્યત્વં સદસત્ત્વં ન સઙ્ગતમ્ ।
ઉક્તદોષદ્વયાપત્તેરતઃ કાર્યં તુ કારણાત્ ।
અભિન્નમેવ ભેદસ્યાસમ્ભવાદેવ વસ્તુતઃ ॥ ૧૯॥

ભેદાભેદસમાખ્યા તુ સુતરાં નૈવ સિધ્યતિ ।
કારણાત્કાર્યજાતસ્ય ભેદાભાવાચ્ચ વસ્તુતઃ ॥ ૨૦॥

કાર્યકારણભેદશ્ચ કારકવ્યાવૃતિસ્તથા ।
ઉત્પત્તિશ્ચ વિનાશશ્ચ તથૈવાર્થક્રિયાઽપિ ચ ॥ ૨૧॥

નામરૂપવિશેષશ્ચ સર્વં ભ્રાન્ત્યા પ્રસિધ્યતિ ॥ ૨૨॥

અતઃ સર્વો વિકારશ્ચ વાચા કેવલમાસ્તિકાઃ ।
અસ્તીત્યારભ્યતે નામધેયમાત્રં હિ સત્સદા ॥ ૨૩॥

પ્રાતીતિકેન રૂપેણ વિકારોઽસત્ય એવ હિ ।
કારણાકાર એવાસ્ય સત્યઃ સાક્ષાત્સદા સુરાઃ ॥ ૨૪॥

કારણાભિન્નરૂપેણ કાર્યં કારણમેવ હિ ।
સદ્રૂપેણ સદા સત્યં ભેદેનોક્તિર્મૃષા ખલુ ॥ ૨૫॥

અતઃ કારણવિજ્ઞાનાત્સર્વવિજ્ઞાનમાસ્તિકાઃ ।
સુતરામુપપન્નં હિ ન સન્દેહોઽસ્તિ કશ્ચન ॥ ૨૬॥

તચ્ચ કારણમેકં હિ ન ભિન્નં નોભયાત્મકમ્ ।
ભેદઃ સર્વત્ર મિથ્યૈવ ધર્મ્યાદેરનિરૂપણાત્ ॥ ૨૭॥

ભેદે જ્ઞાતે હિ ધર્મ્યાદિવિભાગસ્ય ચ વેદનમ્ ।
વિભેદેનૈવ ધર્મ્યાદૌ વિજ્ઞાતે ભેદવેદનમ્ ॥ ૨૮॥

ભેદાનિરૂપણાદેવ ભેદાભેદો ન સઙ્ગતઃ ।
અતશ્ચ કારણં નિત્યમેકમેવાદ્વયં સુરાઃ ॥ ૨૯॥

કુલાલાદેર્મૃદાદેશ્ચ ભેદે દૃષ્ટેઽપિ ભૂતલે ।
અચૈતન્યાન્મૃદાદેસ્તુ કુલાલાદિરપેક્ષ્યતે ॥ ૩૦॥

અત્ર કારણમદ્વૈતં શુદ્ધં ચૈતન્યમેવ હિ ।
તેન નાપેક્ષતે હ્યન્યત્કારણં ચેતનાત્મકમ્ ॥ ૩૧॥

સ્વયં ચેતનમપ્યેતત્કારણં ન કુલાલવત્ ।
અપેક્ષતે મૃદા તુલ્યમચિદ્રૂપં તુ કારણમ્ ॥ ૩૨॥

પ્રતીત્યા કેવલં શક્તિરચિદ્રૂપા તમોમયી ।
સર્વપ્રકારૈર્વિદ્વદ્ભિરનિરૂપ્યાઽસ્તિ શાઙ્કરી ॥ ૩૩॥

તયા દુર્ઘટકારિણ્યા તાદાત્મ્યેનૈવ સઙ્ગતમ્ ।
કારણં સકલસ્રષ્ટૃ સર્વસંહર્તૃ ચાસ્તિકાઃ ॥ ૩૪॥

પાલકં ચ સદા સચ્ચ ચિદ્રૂપત્વાત્સુરોત્તમાઃ ।
ચિદ્રૂપસ્ય તુ સત્યત્વં યુક્તમેવાસ્તિકાઃ સદા ॥ ૩૫॥

અચિદ્રૂપાહિરજ્જ્વાદેર્મૃષાત્વં સમ્મતં ખલુ ।
અતસ્તત્કારણં દેવાઃ સદૈવૈકં ચ શાશ્વતમ્ ॥ ૩૬॥

ઇદં સર્વં જગત્પૂર્વં સદેવાઽસીત્સુરર્ષભાઃ ।
અસદાસીદિતિ ભ્રાન્તા વદન્તિ સુરપુઙ્ગવાઃ ॥ ૩૭॥

અસન્ન કારણં યુક્તં વસ્તુતત્ત્વનિરૂપણે ।
વન્ધ્યાપુત્રોઽપિ સર્વેષાં કારણં સ્યાત્સ્વયં ખલુ ॥ ૩૮॥

સ્વશક્ત્યાઽસચ્ચ સર્વેષાં કારણં ભવતીતિ ચેત્ ।
શક્તિરપ્યસતો નાસ્તિ સતો બીજસ્ય દર્શનાત્ ॥ ૩૯॥

અઙ્કુરોત્પાદિકા શક્તિઃ સદ્રૂપસ્યૈવ દૃશ્યતે ।
ખલુ બીજસ્ય સર્વત્ર નાસતસ્તદદર્શનાત્ ॥ ૪૦॥

સાઽપિ શક્તિઃ સતી કિંવાઽસતી સદસતી તુ વા ।
સતી ચેત્સા સતી શક્તિઃ કથં વન્ધ્યાસુતાશ્રયા ।
આશ્રયત્વં સતો દૃષ્ટં ખલુ લોકે ન ચાસતઃ ॥ ૪૧॥

સાઽસતી ચેત્કથં શક્તિઃ કાર્યનિર્વાહિકાઽસતી ॥ ૪૨॥

વન્ધ્યાપુત્રઃ સ્વયં નૈવ કાર્યનિર્વાહકઃ ખલુ ।
નિર્વાહકત્વધર્મશ્ચ સત એવ હિ દૃશ્યતે ॥ ૪૩॥

શક્તિઃ સદસતી સા ચેદ્દોષદ્વયસમાગમઃ ।

અતઃ સ્વશક્ત્યા ચાસત્તુ સર્વેષાં નૈવ કારણમ્ ॥ ૪૪॥

તસ્માત્સોઽયમસદ્વાદો જલ્પમાત્રં ન યુક્તિમાન્ ।
અતઃ સદેવ સર્વેષાં કારણં નાસદાસ્તિકાઃ ॥ ૪૫॥

સૃષ્ટેસ્તુ પ્રાગિદં સર્વં સદેવાઽઽસીત્તુ કારણમ્ ।
તચ્ચ કારણમાદ્યન્તવિનિર્મુક્તં સદદ્વયમ્ ॥ ૪૬॥

પૂર્વકલ્પપ્રપઞ્ચોત્થસંસ્કારેણાનુરઞ્જિતમ્ ।
કાલકર્મવિપાકેન સત્ત્વવૃત્તિસમાશ્રિતમ્ ॥ ૪૭॥

સૃષ્ટ્યર્થમૈક્ષત પ્રાજ્ઞા બહુ સ્યામિતિ શક્તિમત્ ।
પુનસ્તત્પૂર્વસંસ્કારાદાકાશં વાયુમાદિતઃ ॥ ૪૮॥

સૃષ્ટ્વા તેજસ્તતઃ સૃષ્ટ્વા પુનઃ સૃષ્ટ્વા ત્વપસ્તતઃ ।
અન્નશબ્દોદિતાં દેવાઃ સસર્જ પૃથિવીં પરામ્ ॥ ૪૯॥

તત્પુનઃ કારણં બ્રહ્મ તાનિ ભૂતાનિ પઞ્ચ ચ ।
એકૈકં દ્વિવિધં કૃત્વા તેષાં મધ્યે સુરોત્તમાઃ ॥ ૫૦॥

અંશાન્પઞ્ચ સમાદાય તેષામેકૈકમાસ્તિકાઃ ।
કૃત્વા ચતુર્ધા તેષ્વંશાનાદાય ચતુરઃ સુરાઃ ॥ ૫૧॥

યથાક્રમેણ ભૂતાનાં ચતુરસ્તાંશ્ચ કારણમ્ ।
યથાક્રમેણ ભૂતાર્ધૈનૈકેનૈકં કરોતિ તત્ ॥ ૫૨॥

એવમંશાન્તરાનેતાનાદાય ચતુરઃ સ્વયમ્ ।
એકં ભૂતાન્તરાર્ધેન કરોતિ ક્રમશઃ સુરાઃ ॥ ૫૩॥

એવં ભૂતાનિ સર્વાણિ પઞ્ચીકૃત્ય સુરર્ષભાઃ ।
અણ્ડાનિ ભુવનાન્યાશુ કરોતિ બ્રહ્મ કારણમ્ ॥ ૫૪॥

અણ્ડજં જારજં ચૈવ સ્વેદજં ચોદ્ભિજં તથા ।
કરોતિ કાલપાકેન પ્રાણિકર્મવશેન ચ ॥ ૫૫॥

બ્રહ્મ સર્વત્ર ચિદ્રૂપેણૈવાનુપ્રાપ્ય સાત્ત્વિકાઃ ।
પૃથઙ્નામાનિ રૂપાણિ કુરુતે પૂર્વકલ્પવત્ ॥ ૫૬॥

ઇદં સર્વં જગત્સત્યમિવ ભાતમપિ સ્વતઃ ।
કારણવ્યતિરેકેણ નાસ્ત્યેવાત્ર ન સંશયઃ ॥ ૫૭॥

યદ્ગ્ને રોહિતં રૂપં તદ્રૂપં તૈજસઃ સદા ।
યચ્છુક્લં તદપાં રૂપં યત્કૃષ્ણં ભૌમમેવ તત્ ॥ ૫૮॥

નાસ્તિ રૂપાતિરેકેણ સદા સોઽગ્નિઃ સુરર્ષભાઃ ।
વાચારમ્ભણમાત્રો હિ વિકારો વહ્નિસઞ્જ્ઞિતઃ ॥ ૫૯॥

ત્રીણિ રૂપાણિ હે દેવા એવ સત્યં ન ચાનલઃ ।
યદ્ભાનો રોહિતં રૂપં તદ્રૂપં તૈજસઃ સદા ॥ ૬૦॥

યચ્છુક્લં તદપાં રૂપં યત્કૃષ્ણં ભૌમમેવ તત્ ।
નાસ્તિ રૂપાતિરેકેણ સદાઽઽદિત્યો ન સંશયઃ ॥ ૬૧॥

ભ્રાન્ત્યા કેવલમાદિત્ય ઇત્યાહુરવિવેકિનઃ ।
એવં ચન્દ્રશ્ચ વિજ્ઞેયો વિદ્યુચ્ચ સુરપુઙ્ગવાઃ ॥ ૬૨॥

ઘટકુડ્યાદયો ભાવા ભૂતાનિ ભુવનાનિ ચ ।
સર્વં બ્રહ્માતિરેકેણ નાસ્તિ બ્રહ્મૈવ સત્સદા ॥ ૬૩॥

પૂર્વપૂર્વભ્રમોત્પન્નવાસનાયા બલેન તુ ।
દેહેન્દ્રિયાદિસઙ્ઘાતેઽહમ્મતિર્જાયતે દૃઢમ્ ॥ ૬૪॥

દેહેન્દ્રિયાદયો ભાવા નાહમર્થા નિરૂપણે ।
ભૌતિકત્વાચ્ચ ભૂતાંશૈઃ સદૈવાપ્યાયિતત્વતઃ ॥ ૬૫॥

મૃદમ્ભસા યથા ભિત્તિર્નિર્મિતા વૈ મૃદમ્ભસા ।
આપ્યાયતે તથા ભુક્તૈર્ભૂતૈર્દેહાદયોઽપિ ચ ॥ ૬૬॥

અતો દેહાદિસઙ્ઘાતેઽહમ્મમેત્યાદિકાં મતિમ્ ।
વિસૃજ્ય સાક્ષિચૈતન્યે વિદ્વાન્કુર્યાદહમ્મતિમ્ ॥ ૬૭॥

દધ્નઃ સર્પિર્યથા જાતં મન્થનેન સુરર્ષભાઃ ।
તથા બુદ્ધ્યાદયો ભાવા ભૂતેભ્યશ્ચોદ્ભવન્તિ હિ ॥ ૬૮॥

ભૌતિકં દેહસઙ્ઘાતં વિસૃજ્ય મતિમાન્પુનઃ ।
સર્વસાક્ષિણિ ચિદ્રૂપે કુર્યાન્નિત્યમહમ્મતિમ્ ॥ ૬૯॥

અન્નેનાપ્યાયતેઽભુક્તે નાધીતં તસ્ય ભાસતે ।
તતોઽપિ બુદ્ધિરન્નસ્ય કાર્યમેવ ન સંશયઃ ॥ ૭૦॥

અતોઽપિ બુદ્ધિમન્નસ્ય કાર્યં ત્યક્ત્વા વિવિક્તધીઃ ।
સર્વસાક્ષિણિ ચિદ્રૂપે કુર્યાન્નિત્યમહમ્મતિમ્ ॥ ૭૧॥

દેહેન્દ્રિયાદિસઙ્ઘાતેઽહમ્મમેત્યાદિકાં મતિમ્ ।
ત્યક્ત્વા સ્વાત્મનિ ચિદ્રૂપે યદાઽપીતો ભવત્યયમ્ ॥ ૭૨॥

તદા સ્વપિતિ દુઃખાદિદર્શનં ચ ન વિદ્યતે ।
સ્વાત્મરૂપસુખપ્રાપ્તિરેવં દૃષ્ટાઽસ્ય દેહિનઃ ॥ ૭૩॥

અતોઽપિ મતિમાન્નિત્યં ત્યક્ત્વા દેહાદિગાં ધિયમ્ ।
સર્વસાક્ષિણિ ચિદ્રૂપે સાક્ષાત્કુર્યાદહમ્મતિમ્ ॥ ૭૪॥

યદિદં સાક્ષિણા વેદ્યં તત્સર્વં બ્રહ્મ કેવલમ્ ।
તત્સત્યં પૂર્ણચૈતન્યં તત્ત્વમર્થો ન સંશયઃ ॥ ૭૫॥

ત્વંશબ્દાર્થો ય આભાતિ સોઽહંશબ્દાર્થ એવ હિ ।
યોઽહંશબ્દાર્થ આભાતિ સ ત્વંશબ્દાર્થ એવ હિ ॥ ૭૬॥

ત્વમહંશબ્દલક્ષ્યાર્થઃ સાક્ષાત્પ્રત્યક્ચિતિઃ પરા ।
તચ્છબ્દસ્ય ચ લક્ષ્યાર્થઃ સૈવ નાત્ર વિચારણા ॥ ૭૭॥

ત્વમહંશબ્દવાચ્યાર્થસ્યૈવ દેહાદિવસ્તુનઃ ।
ન તચ્છબ્દાર્થતાં વક્તિ શ્રુતિસ્તત્ત્વમસીતિ સા ॥ ૭૮॥

તદર્થૈક્યવિરુદ્ધાંશં ત્યક્ત્વા વાચ્યગતં શ્રુતિઃ ।
અવિરુદ્ધચિદાકારં લક્ષયિત્વા બ્રવીતિ હિ ॥ ૭૯॥

તદર્થે ચ ત્વમર્થૈક્યવિરુદ્ધાંશં વિનૈવ તુ ।
કારણત્વાદિવાચ્યસ્થં લક્ષયિત્વા તુ કેવલમ્ ॥ ૮૦॥

ચિદાકારં પુનસ્તસ્ય ત્વમર્થૈક્યં બ્રવીતિ ચ ।
તત્ત્વંશબ્દાર્થલક્ષ્યસ્ય ચિન્માત્રસ્ય પરાત્મનઃ ॥ ૮૧॥

એકત્વં યત્સ્વતઃસિદ્ધં સ હિ વાક્યાર્થ આસ્તિકાઃ ।
ઇતોઽન્યથા યો વાક્યાર્થઃ સોઽવાક્યાર્થો ન સંશયઃ ॥ ૮૨॥

એકત્વપ્રમિતિં વાક્યં ન કરોતિ સુરર્ષભાઃ ।
વ્યાવહારિકમજ્ઞાનં બાધતે વિદ્યયૈવ તુ ॥ ૮૩॥

સદા પ્રમિતમેકત્વં સ્વત એવ ન ચાન્યતઃ ।
અતો ન પ્રમિતિં વાક્યં કુરુતેઽજ્ઞાનબાધકમ્ ॥ ૮૪॥

વસ્તુતો નાસ્તિ ચાજ્ઞાનં ચિત્પ્રકાશવિરોધતઃ ।

અતો વાક્યં ન ચાજ્ઞાનબાધકં ચ નિરૂપણે ॥ ૮૫॥

એકત્વં યત્પુરા પ્રોક્તં તત્સ્વયં સેદ્ધુમર્હતિ ।
ન પ્રમાણેન માનાનિ તસ્મિન્કુણ્ઠીભવન્તિ હિ ॥ ૮૬॥

વ્યાવહારિકમજ્ઞાનમપિ બ્રહ્મૈવ વસ્તુતઃ ।
અજ્ઞાનમિતિ વાર્તાઽપિ ત્વર્થસદ્ભાવ એવ હિ ॥ ૮૭॥

સત એવ હિ સદ્ભાવો નાસતઃ સૂક્ષ્મદર્શને ।
સદસત્કોટિનિર્મુક્તમિત્યુક્તિશ્ચાર્થભાસને ।
ખલુ નાભાસતે ભાનં બ્રહ્મ વસ્ત્વેવ કેવલમ્ ॥ ૮૮॥

ભાનસમ્બન્ધતોઽભાનમિતિ વાર્તાઽપ્યસઙ્ગતા ॥ ૮૯॥
સમ્બન્ધિરૂપસદ્ભાવે સતિ સમ્બન્ધસમ્ભવઃ ।
સદ્ભાવે સતિ સમ્બન્ધિરૂપં બ્રહ્મૈવ કેવલમ્ ॥ ૯૦॥

અનિરૂપિતરૂપેણ સદ્ભાવ ઇતિ ચેન્મતમ્ ।
અનિરૂપિતરૂપસ્ય રૂપં તુ બ્રહ્મ કેવલમ્ ।
બ્રહ્મૈવ રૂપં નૈવાન્યન્ન રૂપમપરસ્ય હિ ॥ ૯૧॥

અસ્તિ ચેદપરસ્યાપિ રૂપં તર્હિ સુરોત્તમાઃ ।
રૂપરૂપેણ રૂપં ચ બ્રહ્મરૂપં ભવેત્ખલુ ॥ ૯૨॥

બ્રહ્મરૂપેણ નાન્યસ્ય રૂપં રૂપાન્તરેણ ચેત્ ॥ ૯૩॥

તર્હિ રૂપાન્તરં રૂપાદ્ભિન્નં વાઽભિન્નમેવ વા ।
ભિન્નાભિન્નં ન વા ભિન્નં યદિ રૂપાદ્વિભેદતઃ ॥ ૯૪॥

તુચ્છવત્તદરૂપં સ્યાદભિન્નં ચેત્તદેવ તત્ ।
ઉક્તદોષદ્વયાપત્તેર્ભિન્નાભિન્નં ન તદ્ભવેત્ ॥ ૯૫॥

અત એવ સુરશ્રેષ્ઠા અનિરૂપિતરૂપતઃ ।
સદ્ભાવ ઇતિ વાર્તા ચ વાર્તૈવ ખલુ કેવલમ્ ॥ ૯૬॥

તસ્માદજ્ઞાનમેવૈતદ્બ્રહ્મૈવ સતતોદિતમ્ ।
અજ્ઞાનમયમેવેદં સર્વમિત્યપિ ભાષણમ્ ।
નૈવ ભાષણમજ્ઞાનાભાવાદેવ શિવં વિના ॥ ૯૭॥

તસ્માદજ્ઞાનમજ્ઞાનકાર્યં ચ સુરપુઙ્ગવાઃ ॥ ૯૮॥

એકં બ્રહ્મૈવ નૈવાન્યદિતિ મે નિશ્ચિતા મતિઃ ।

ઐતદાત્મ્યમિદં સર્વમિત્યાહ હિ પરા શ્રુતિઃ ॥ ૯૯॥

સાક્ષાદર્થસ્વભાવેન શ્રુતિઃ સેયં પ્રવર્તતે ।
શ્રોતુશ્ચિત્તાવિપાકેન વિષણ્ણા વિવશા શ્રુતિઃ ॥ ૧૦૦॥

ક્વચિત્કદાચિદન્યાર્થં વક્તિ ચ બ્રહ્મણઃ પૃથક્ ।
સાધ્યસાધનસમ્બન્ધકથનં ફલભાષણમ્ ॥ ૧૦૧॥

જગદ્વૈચિત્ર્યનિર્દેશો ધર્માધર્માર્થભાષણમ્ ।
વર્ણાશ્રમવિભાગોક્તિસ્તદ્ધર્મોક્તિસ્તથૈવ ચ ॥ ૧૦૨॥

શોભનાશોભનોક્તિશ્ચ ભૂતભૌતિકભાષણમ્ ।
શબ્દાનાં ભેદનિર્દેશસ્તથાऽર્થાનાં ચ ભાષણમ્ ॥ ૧૦૩॥

આત્મનોऽન્યસ્ય સર્વસ્ય સદ્ભાવોક્તિઃ સુરર્ષભાઃ ।
મિથ્યાત્વભાષણં તસ્ય માયાસદ્ભાવભાષણમ્ ॥ ૧૦૪॥

માયાત્વોક્તિશ્ચ માયાયા બન્ધ ઇત્યભિભાષણમ્ ।
ગુરુશિષ્યકથોક્તિશ્ચ બ્રહ્મવિદ્યાભિભાષણમ્ ॥ ૧૦૫॥

શાસ્ત્રાણામપિ નિર્દેશસ્તર્કાણામપિ ભાષણમ્ ।
અન્યદ્વિતર્કજાલં યત્તદુક્તિશ્ચ સમાસતઃ ।
અન્યાર્થેન પરં બ્રહ્મ શ્રુતિઃ સાધ્વી ન તત્પરા ॥ ૧૦૬॥

ચિત્તપાકાનુગુણ્યેન શ્રોતૄણાં પરમા શ્રુતિઃ ।
સોપાનક્રમતો દેવા મન્દં મન્દં હિતં નૃણામ્ ॥ ૧૦૭॥

ઉપદિશ્ય વિષણ્ણાऽપિ પુનઃ પક્વાધિકારિણઃ ।
ઐતદાત્મ્યમિદં સર્વમિત્યાહ પરમાદ્વયમ્ ॥ ૧૦૮॥

જગજ્જીવેશ્વરત્વાદિવિચિત્રવિભવં વિના ।
કેવલં ચિત્સદાનન્દબ્રહ્માત્મૈક્યપરા શ્રુતિઃ ॥ ૧૦૯॥

જગજ્જીવેશ્વરત્વાદિ સર્વં બ્રહ્મૈવ કેવલમ્ ।
ઇતિ સ્વપૂર્ણતાજ્ઞાનં પરમાદ્વૈતવેદનમ્ ॥ ૧૧૦॥

ઇતોऽન્યદ્યત્પરિજ્ઞાનં તદજ્ઞાનં ન સંશયઃ ।
વિચારેણાયમેવાર્થસ્ત્વયમેવાવિચારણે ॥ ૧૧૧॥

ન કદાચિદ્વિશેષોऽસ્તીત્યેતજ્જ્ઞાનં સુદુર્લભમ્ ॥ ૧૧૨॥

યથા યથા સ્વભાવેન યદ્યદ્ભાતિ સુરર્ષભાઃ ।
તથા તથા શિવો ભાતિ સ્વયમેવ ન ચાપરઃ ॥ ૧૧૩॥

યથા યથા પ્રભા સાક્ષાચ્છામ્ભવી સા ન ચાપરા ।
ઇતિ નિશ્ચયવિજ્ઞાનં પરમાદ્વૈતવેદનમ્ ॥ ૧૧૪॥

યથા યથાઽવભાસોઽયં શિવ એવેતિ પશ્યતિ ।
તથા તથા મહાદેવં ભજતેઽયત્નતસ્તુ સઃ ॥ ૧૧૫॥

યથા યથા પ્રથા પુંસસ્તદ્વસ્તુષ્વનવસ્થિતા ।
તથા તથાઽનુસન્ધાનં સ્વભાવેનૈવ પૂજનમ્ ॥ ૧૧૬॥

શિવરૂપતયા સર્વં યો વેદ સ હિ તત્ત્વવિત્ ।
અશિવં વેદ યત્કિઞ્ચિત્સ એવ પરિમોહિતઃ ॥ ૧૧૭॥

શિવાદન્યતયા કિઞ્ચિદપિ યો વેદ સોઽધમઃ ।
શિવસ્યૈવાપચારં હિ કુરુતે સ પશુર્નરઃ ॥ ૧૧૮॥

શિવરૂપતયા સર્વં યસ્ય ભાતિ સ્વભાવતઃ ।
સ્વેચ્છાચારઃ સમાચારસ્તસ્ય ચાર્ચા ચ શૂલિનઃ ॥ ૧૧૯॥

યથા યથા પ્રભા શમ્ભોઃ પ્રથા સા સા તદર્ચનમ્ ।
ઇત્યયત્નેન વિજ્ઞાનાત્પૂજ્યતે પરમેશ્વરઃ ॥ ૧૨૦॥

ક્રીડયા જગદાકારા નાન્યતશ્ચાત્મદેવતા ।
ક્રીડયૈવાત્મનાઽઽત્માનં ભુઙ્ક્તે સા તદ્ધિ વેદનમ્ ॥ ૧૨૧॥

ઇન્દ્રિયાકારભાસા સા વિષયાકારભાસનમ્ ।
ક્રીડયા દેવતા ભુઙ્ક્તે સ્વત ઇત્યર્ચનં મતમ્ ॥ ૧૨૨॥

પરમાદ્વૈતવિજ્ઞાનમિદં ભવભયાપહમ્ ।
ભવપ્રસાદતો લભ્યં ભાવનારહિતં પરમ્ ॥ ૧૨૩॥

યથા નક્તન્દૃશઃ સૂર્યપ્રકાશો નાવભાસતે ।
તથેદં પરમાદ્વૈતં મનુષ્યાણાં ન ભાસતે ॥ ૧૨૪॥

પ્રસાદાદેવ રુદ્રસ્ય શ્રદ્ધયા સ્વસ્ય ધૈર્યતઃ ।
દેશિકાલોકનાચ્ચૈવ કર્મસામ્યે પ્રકાશતે ॥ ૧૨૫॥

બહુપ્રકારં બહુશઃ શ્રુતિઃ સાધ્વી સનાતની ।
એવમેતં મહાયાસાદર્થં વદતિ દુઃખિનામ્ ॥ ૧૨૬॥

શિવ એવાસ્તિ નૈવાન્યદિતિ યો નિશ્ચયઃ સ્થિરઃ ।
સદા સ એવ સિદ્ધાન્તઃ પૂર્વપક્ષાસ્તથા પરે ॥ ૧૨૭॥

અયમેવ હિ વેદાર્થો નાપરઃ પરમાસ્તિકાઃ ।
ગૃહ્ણામિ પરશું તપ્તં સત્યમેવ ન સંશયઃ ॥ ૧૨૮॥

અયમેવ હિ સત્યાર્થો નાપરઃ પરમાસ્તિકાઃ ।
વિશ્વાસાર્થં શિવં સ્પૃષ્ટ્વા ત્રિર્વઃ શપથયામ્યહમ્ ॥ ૧૨૯॥

અયમેવ હિ વેદાર્થો નાપરઃ પરમાસ્તિકાઃ ।
અન્યથા ચેત્સુરાઃ સત્યં મૂર્ધા મેઽત્ર પતિષ્યતિ ॥ ૧૩૦॥

અયમેવ હિ સત્યાર્થો નાપરઃ પરમાસ્તિકાઃ ।
અત્રૈવ સન્નિધિં દેવો વિશ્વાસાર્થં કરિષ્યતિ ॥ ૧૩૧॥

સૂત ઉવાચ -
એવમુક્ત્વા તુ ભગવાન્બ્રહ્મા સર્વહિતે રતઃ ।
પ્રણમ્ય દણ્ડવદ્ભૂમૌ ભક્ત્યા પરવશોઽભવત્ ॥ ૧૩૨॥

અસ્મિન્નવસરે શ્રીમાઞ્શઙ્કરઃ શશિશેખરઃ ।
નીલકણ્ઠો વિરૂપાક્ષઃ સામ્બઃ સાક્ષાદ્ઘૃણાનિધિઃ ॥ ૧૩૩॥

બ્રહ્મવિષ્ણુમહેશાદ્યૈરુપાસ્યો ગુણમૂર્તિભિઃ ।
આવિર્બભૂવ સર્વજ્ઞસ્તત્રૈવ સુરસન્નિધૌ ॥ ૧૩૪॥

આસનં વિમલં દિવ્યં શિવાર્હં હૈમમદ્ભુતમ્ ।
આગતં તત્ર ભગવાનાસ્તે તસ્મિન્યથાસુખમ્ ॥ ૧૩૫॥

વિષ્ણુર્વિશ્વજગત્કર્તા શિવસ્યામિતતેજસઃ ।
બુદ્ધ્વોદ્યોગં મહાપ્રીતસ્તત્ર સન્નિહિતોઽભવત્ ॥ ૧૩૬॥

પુષ્પવૃષ્ટિરભવત્પુનઃ પુનઃ
    શબ્દિતં ચ મુનિભિઃ સનાતનૈઃ ।
શુદ્ધવેદવચનૈઃ સુશોભનૈ-
    ર્ભક્તિમદ્ભિરપિ પૂજનં કૃતમ્ ॥ ૧૩૭॥

ઉચ્ચમન્દમૃદુતીવ્રકાહલૈઃ
    શબ્દિતં ચ પટહાદિભિસ્તથા ।

તાલમાનકુશલૈસ્તથા પરૈ-
    ર્ભેરિકાદિકુશલૈઃ સુઘોષિતમ્ ॥ ૧૩૮॥

અપ્સરોભિરપિ નર્તનં કૃતં
    ગાયનૈશ્ચ સહિતૈર્મહત્તરૈઃ ।
ગીતમાશુ કવિભિશ્ચ કીર્તિતં
    સ્થાનમીશદૃશિગોચરં દ્વિજાઃ ॥ ૧૩૯॥

વિસ્મિતાશ્ચ મુનયશ્ચ કેચન
    શ્રદ્ધયૈવ શિરસા ચ નર્તિતાઃ ।
મુષ્ટિયુદ્ધમપિ કુર્યુરાસ્તિકાઃ
    શ્રદ્ધયૈવ પરયા ચ કેચન ॥ ૧૪૦॥

મસ્તકેન મનુજાનતિપ્રિયાન્
    પૃષ્ઠતશ્ચ ચરણેન પાણિના ।
દણ્ડરજ્જુશિબિકાદિભિસ્તથા
    કેચિદશ્વનિકરૈર્વહન્તિ ચ ॥ ૧૪૧॥

બન્ધનં ચ નિગડૈશ્ચ ગર્વિતા
    મોચનં ચ મનુજાનતિપ્રિયાન્ ।
કુર્યુરસ્ત્રનિકરૈશ્ચ કેચન
    ચ્છેદનં ચ વિવશાશ્ચ કેચન ॥ ૧૪૨॥

અન્યોન્યમાલિઙ્ગનમાચરન્તિ
    પ્રિયેણ કેચિન્મુનયશ્ચ કેચિત્ ।
ધાવન્તિ વેગેન પટં વિસૃજ્ય
    પ્રિયેણ ચાન્યાનપિ તાડયન્તિ ॥ ૧૪૩॥

વિલોક્ય સર્વં શિવયા શિવોઽપિ
    પ્રહૃષ્ટચિત્તસ્તુ નિવાર્ય સર્વાન્ ।
હરિં વિરઞ્ચિં ચ સુરાનશેષા-
    નતિપ્રિયેણૈવ નિરીક્ષ્ય વિપ્રાઃ ॥ ૧૪૪॥

ઉવાચ સત્યં કરુણાનિધાનઃ
    શ્રુતિપ્રમાણૈકસુનિશ્ચિતાર્થઃ ।
હિતાય લોકસ્ય સુરાસુરાદ્યૈઃ
    પ્રપૂજનીયશ્ચ સદા મહેશઃ ॥ ૧૪૫॥

ઈશ્વર ઉવાચ :

અહં હિ સર્વં ન ચ કિઞ્ચિદન્ય-
    ન્નિરૂપણાયામનિરૂપણાયામ્ ।
ઇયં હિ વેદસ્ય પરા હિ નિષ્ઠા
    મમાનુભૂતિશ્ચ ન સંશયશ્ચ ॥ ૧૪૬॥

અહં સદાઽધશ્ચ યથાઽહમૂર્ધ્વં
    ત્વહં પુરસ્તાદહમેવ પશ્ચાત્ ।
અહં ચ સવ્યેતરમાસ્તિકાસ્તથા
    ત્વહં સદૈવોત્તરતોઽન્તરાલમ્ ॥ ૧૪૭॥

પરોક્ષરૂપેણ સુસંસ્થિતોઽહં
    તથાઽપરોક્ષેણ સુસંસ્થિતોઽહમ્ ।
અનાત્મરૂપેણ સુસંસ્થિતોઽહં
    સદાત્મરૂપેણ સુસંસ્થિતોઽહમ્ ॥ ૧૪૮॥

જૈવેન રૂપેણ સુસંસ્થિતોઽહમ્
    તથેશરૂપેણ સુસંસ્થિતોઽહમ્ ।
અજ્ઞાનરૂપેણ સુસંસ્થિતોઽહમ્
    વિજ્ઞાનરૂપેણ સુસંસ્થિતોઽહમ્ ॥ ૧૪૯॥

સંસારરૂપેણ સુસંસ્થિતોઽહમ્
    કૈવલ્યરૂપેણ સુસંસ્થિતોઽહમ્ ।
શિષ્યાદિરૂપેણ સુસંસ્થિતોઽહમ્
    ગુર્વાદિરૂપેણ સુસંસ્થિતોઽહમ્ ॥ ૧૫૦॥

વેદાદિરૂપેણ સુસંસ્થિતોઽહં
    સ્મૃત્યાદિરૂપેણ સુસંસ્થિતોઽહમ્ ।
પુરાણરૂપેણ સુસંસ્થિતોઽહં
    કલ્પાદિરૂપેણ સુસંસ્થિતોઽહમ્ ॥ ૧૫૧॥

પ્રમાતૃરૂપેણ સુસંસ્થિતોઽહં
    પ્રમાણરૂપેણ સુસંસ્થિતોઽહમ્ ।
પ્રમેયરૂપેણ સુસંસ્થિતોઽહં
    મિતિસ્વરૂપેણ સુસંસ્થિતોઽહમ્ ॥ ૧૫૨॥

કર્તૃસ્વરૂપેણ સુસંસ્થિતોઽહં
    ક્રિયાસ્વરૂપેણ સુસંસ્થિતોઽહમ્ ।
તદ્ધેતુરૂપેણ સુસંસ્થિતોઽહં
    ફલસ્વરૂપેણ સુસંસ્થિતોઽહમ્ ॥ ૧૫૩॥

ભોક્તૃસ્વરૂપેણ સુસંસ્થિતોઽહં
    ભોગસ્વરૂપેણ સુસંસ્થિતોઽહમ્ ।
તદ્ધેતુસ્વરૂપેણ સુસંસ્થિતોઽહં
    ભોગ્યસ્વરૂપેણ સુસંસ્થિતોઽહમ્ ॥ ૧૫૪॥

પુણ્યસ્વરૂપેણ સુસંસ્થિતોઽહં
    પાપસ્વરૂપેણ સુસંસ્થિતોઽહમ્ ।
સુખસ્વરૂપેણ સુસંસ્થિતોઽહં
    દુઃખસ્વરૂપેણ સુસંસ્થિતોઽહમ્ ॥ ૧૫૫॥

રુદ્રપ્રભેદેન સુસંસ્થિતોઽહં
    વિષ્ણુપ્રભેદેન સુસંસ્થિતોઽહમ્ ।
બ્રહ્મપ્રભેદેન સુસંસ્થિતોઽહં
    દેવપ્રભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૫૬॥

મર્ત્યપ્રભેદેન સુસંસ્થિતોઽહં
    તિર્યક્પ્રભેદેન સુસંસ્થિતોઽહં
કૃમિપ્રભેદેન સુસંસ્થિતોઽહં
    કીટપ્રભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૫૭॥

વૃક્ષપ્રભેદેન સુસંસ્થિતોઽહં
    ગુલ્મપ્રભેદેન સુસંસ્થિતોઽહમ્ ।
લતાપ્રભેદેન સુસંસ્થિતોઽહં
    તૃણપ્રભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૫૮॥

કલાપ્રભેદેન સુસંસ્થિતોઽહં
    ઘટપ્રભેદેન સુસંસ્થિતોઽહમ્ ।
પટપ્રભેદેન સુસંસ્થિતોઽહં
    કુડ્યાદિભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૫૯॥

અન્નપ્રભેદેન સુસંસ્થિતોઽહં
    પાનપ્રભેદેન સુસંસ્થિતોઽહમ્ ।

વનપ્રભેદેન સુસંસ્થિતોઽહં
    ગિરિપ્રભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૬૦॥

નદીપ્રભેદેન સુસંસ્થિતોઽહં
    નદપ્રભેદેન સુસંસ્થિતોઽહમ્ ।
સમુદ્રપ્રભેદેન સુસંસ્થિતોઽહં
    તટપ્રભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૬૧॥

તડાગભેદેન સુસંસ્થિતોઽહં
    અભ્રપ્રભેદેન સુસંસ્થિતોઽહમ્ ।
નક્ષત્રભેદેન સુસંસ્થિતોઽહં
    ગ્રહપ્રભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૬૨॥

મેઘપ્રભેદેન સુસંસ્થિતોઽહં
    વિદ્યુત્પ્રભેદેન સુસંસ્થિતોઽહમ્ ।
યક્ષપ્રભેદેન સુસંસ્થિતોઽહં
    રક્ષઃપ્રભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૬૩॥

ગન્ધર્વભેદેન સુસંસ્થિતોઽહં
    સિદ્ધપ્રભેદેન સુસંસ્થિતોઽહમ્ ।
અણ્ડપ્રભેદેન સુસંસ્થિતોઽહં
    લોકપ્રભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૬૪॥

દેશપ્રભેદેન સુસંસ્થિતોઽહં
    ગ્રામપ્રભેદેન સુસંસ્થિતોઽહમ્ ।
ગૃહપ્રભેદેન સુસંસ્થિતોઽહં
    મઠપ્રભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૬૫॥

કટપ્રભેદેન સુસંસ્થિતોઽહં
    પ્રાકારભેદેન સુસંસ્થિતોઽહમ્ ।
પુરપ્રભેદેન સુસંસ્થિતોઽહં
    પુરીપ્રભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૬૬॥

વ્યોમાદિભેદેન સુસંસ્થિતોઽહં
    શબ્દાદિભેદેન સુસંસ્થિતોઽહમ્ ।
શરીરભેદેન સુસંસ્થિતોઽહં
    પ્રાણપ્રભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૬૭॥

શ્રોત્રાદિભેદેન સુસંસ્થિતોઽહં
    પદાદિભેદેન સુસંસ્થિતોઽહમ્ ।
મનઃપ્રભેદેન સુસંસ્થિતોઽહં
    બુદ્ધિપ્રભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૬૮॥

અહમ્પ્રભેદેન સુસંસ્થિતોઽહં
    ચિત્તપ્રભેદેન સુસંસ્થિતોઽહમ્ ।
સઙ્ઘાતભેદેન સુસંસ્થિતોઽહં
    જન્માદિભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૬૯॥

જાગ્રત્પ્રભેદેન સુસંસ્થિતોઽહં
    સ્વપ્નપ્રભેદેન સુસંસ્થિતોઽહમ્ ।
સુષુપ્તિભેદેન સુસંસ્થિતોઽહં
    તુરીયભેદેન સુસંસ્થિતોઽહમ્ ॥ ૧૭૦॥

દૃશ્યપ્રભેદેન સુસંસ્થિતોઽહં
    દ્રષ્ટૃપ્રભેદેન સુસંસ્થિતોઽહમ્ ।
સાક્ષિસ્વરૂપેણ સુસંસ્થિતોઽહં
    સર્વસ્વરૂપેણ સુસંસ્થિતોઽહમ્ ॥ ૧૭૧॥

અસ્તિનાસ્તિવચનેન ભાષિતં
    ભાતિશબ્દપરિભાષિતં તથા ।
ભાનહીનપરિભાષિતં ચ મે
    રૂપમેવ હિ ન સંશયઃ ક્વચિત્ ॥ ૧૭૨॥

શબ્દગોચરતયા સ્થિતં સદા
    શબ્દગોચરવિહીનરૂપતઃ ।
યત્સ્થિતં તદહમેવ સન્તતં
    પ્રત્યયેઽપિ ગતિરેવમેવ હિ ॥ ૧૭૩॥

નિત્યશુદ્ધપરિબુદ્ધમુક્તતાં
    યસ્ય નિત્યમિતિ વક્તિ વાક્ શ્રુતેઃ ।
તસ્ય સત્યસુખબોધપૂર્ણતા
    તથ્યમેવ મમ નાસ્તિ સંશયઃ ॥ ૧૭૪॥

યત્સ્વરૂપમહમાત્મના તથા

યત્સ્વરૂપમિદમાત્મનૈવ તુ ।
ભાતિ તત્તુ મમ ચિદ્વપુઃ સદા
ભાતિ નાન્યદિતિ નિશ્ચયો મમ ॥ ૧૭૫॥

અહં સમસ્તં મમ રૂપતઃ પૃથઙ્
ન કિઞ્ચિદસ્તીતિ સુનિશ્ચયઃ કૃતઃ ।
મયા તુ વેદાન્તવચોભિરઞ્જસા
પિતામહેનાપિ ચ સત્યમીરિતમ્ ॥ ૧૭૬॥

અત્ર સંશયમતિર્વિનશ્યતિ
ભ્રષ્ટ એવ પરમાર્થદર્શનાત્ ।
અત્ર નિશ્ચયમતિસ્તુ મુચ્યતે
કષ્ટરૂપભવપાશબન્ધનાત્ ॥ ૧૭૭॥

સૂત ઉવાચ ।
એવમુક્ત્વા મહાદેવઃ સામ્બઃ સંસારમોચકઃ ।
સમાલિઙ્ગ્ય મહાવિષ્ણું બ્રહ્માણમપિ સાદરમ્ ॥ ૧૭૮॥

વિલોક્ય દેવાનખિલાન્વિશુદ્ધેનૈવ ચેતસા ।
ભદ્રમસ્તુ સુરશ્રેષ્ઠા યુષ્માકમિતિ ચાબ્રવીત્ ॥ ૧૭૯॥

દેવાશ્ચ દેવદેવેશં પ્રસન્નં કરુણાનિધિમ્ ।
પૂજયામાસુરાહ્લાદાત્પત્રપુષ્પફલાદિભિઃ ॥ ૧૮૦॥

વિષ્ણુર્વિશ્વજગત્કર્તા વિશ્વેશાઙ્ઘ્રિસરોરુહમ્ ।
સ્વમૂર્ધ્નિ ભક્ત્યા નિક્ષિપ્ય પુનઃ પરવશોઽભવત્ ॥ ૧૮૧॥

પિતામહોઽપિ સર્વાત્મા શિવપાદામ્બુજદ્વયમ્ ।
સ્વમૂર્ધ્નિ ભક્ત્યા નિક્ષિપ્ય પુનઃ પરવશોઽભવત્ ॥ ૧૮૨॥

દેવદેવો મહાદેવઃ સામ્બઃ સંસારમોચકઃ ।
નનર્ત પરમં ભાવમૈશ્વરં સમ્પ્રદર્શયન્ ॥ ૧૮૩॥

કરતાલં મહાદેવી કરુણાસાગરા પરા ।
ચકાર પરમપ્રીત્યા સમાલોક્ય મહેશ્વરમ્ ॥ ૧૮૪॥

વિષ્ણુર્બ્રહ્મા સુરાઃ સર્વે તત્ર સન્નિહિતા જનાઃ ।
સર્વે સન્તોષતસ્તત્ર નૃત્યન્તિ સ્મ યથાબલમ્ ॥ ૧૮૫॥

દેવદેવો મહાદેવો મહાનન્દોદધિર્દ્વિજાઃ ।
વિલોક્ય સર્વાન્સુપ્રીતસ્તત્રૈવાન્તર્હિતોઽભવત્ ॥ ૧૮૬॥

વિષ્ણુર્બ્રહ્માણમાલિઙ્ગ્ય વિલોક્ય સકલાન્સુરાન્ ।
પ્રસન્નઃ પદ્મયા સાર્ધં વૈકુણ્ઠમગમત્પ્રભુઃ ॥ ૧૮૭॥

બ્રહ્માઽપિ વિસ્મયાપન્નો વિલોક્ય સકલાન્સુરાન્ ।
અવશઃ સન્પુનશ્ચાહ શ્રદ્ધયૈવ તુ કેવલમ્ ॥ ૧૮૮॥

બ્રહ્મોવાચ ।
વિદ્યાઃ સર્વા નૃણાં સાક્ષાત્સંસારસ્ય પ્રવર્તિકાઃ ।
આત્મવિદ્યા તુ સંસારતમસઃ પ્રતિઘાતિની ॥ ૧૮૯॥

આત્મવિદ્યાવિહીનસ્ય શોકસાગર એવ હિ ।
મુક્તિરેવાત્મનિષ્ઠસ્ય નાસ્તિ સંશયકારણમ્ ॥ ૧૯૦॥

યત્રાન્યત્પશ્યતિ પ્રાણી શ ृણોત્યન્યત્તથૈવ ચ ।
અન્યજ્જાનાતિ ચાલ્પં તદ્યદલ્પં મર્ત્યમેવ તત્ ॥ ૧૯૧॥

યત્ર પશ્યતિ નાન્યચ્ચ ન શ ृણોત્યન્યદાસ્તિકાઃ ।
અન્યચ્ચ ન વિજાનાતિ સ ભૂમા સુરપુઙ્ગવાઃ ॥ ૧૯૨॥

યો વૈ ભૂમા સુખં તદ્ધિ તદ્ધિ કૈવલ્યમુત્તમમ્ ।
નાલ્પે ચાસ્તિ સુખં તસ્માન્મહાદ્વૈતપરો ભવેત્ ॥ ૧૯૩॥

મહાદ્વૈતપરસ્યાસ્ય ન નાશો જન્મ નૈવ ચ ।
નૈવ ગત્યાગતી નાન્યદ્બન્ધનં ન વિમોચનમ્ ॥ ૧૯૪॥

અત્રૈવ લીયતે સમ્યક્સર્વમાત્મતયા સ્વતઃ ।
ધૃતકાઠિન્યવત્સ્વપ્નપ્રપઞ્ચપ્રતિભાસવત્ ॥ ૧૯૫॥

સર્વમેતદતિશોભનં પરં કેવલં કરુણયૈવ ભાષિતમ્ ।
દેવદેવચરણપ્રસાદતો નેતરદ્ધિ કથનીયમસ્તિ વઃ ॥ ૧૯૬॥

ઇતિ બ્રહ્મગીતાસૂપનિષત્સુ
આદેશકથનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

॥ અથ ષષ્ઠોઽધ્યાયઃ ॥

॥ દહરોપાસનવિવરણમ્ ॥

બ્રહ્મોવાચ ।

અસ્મિન્બ્રહ્મપુરે વેશ્મ દહરં યદિદં સુરાઃ ।
પુણ્ડરીકં તુ તન્મધ્ય આકાશો દહરોઽસ્તિ તુ ॥ ૧॥

સ શિવઃ સચ્ચિદાનન્દઃ સોઽન્વેષ્ટવ્યો મુમુક્ષિભિઃ ।
સ વિજિજ્ઞાસિતવ્યશ્ચ વિના સઙ્કોચમાસ્તિકાઃ ॥ ૨॥

સ્વાભિવ્યઞ્જકસઙ્કોચત્સઙ્કોચપ્રતિભાઽઽત્મનઃ ।
ન સ્વરૂપેણ ચિદ્રૂપં સર્વવ્યાપિ સદા ખલુ ॥ ૩॥

જ્ઞાતરૂપેણ ચાજ્ઞાતસ્વરૂપેણ ચ સાક્ષિણઃ ।
સર્વં ભાતિ તદાભાતિ તતસ્તદ્વ્યાપિ સર્વદા ॥ ૪॥

સ્વયં સેદ્ધુમશક્યં હિ જડાત્મકમિદં જગત્ ।
ચિત્સમ્બન્ધબલેનૈવ ખલુ ભાતિ ન ચાન્યથા ॥ ૫॥

અતોઽવભાસ્યં સકલં વ્યાપ્ય તદ્ભાસકઃ શિવઃ ।
સ્વતો વ્યાપી ન ચાવ્યાપી સઙ્કોચશ્ચાન્યસઙ્ગમાત્ ॥ ૬॥

યાવાન્વા અયમાકાશસ્તાવાનાકાશ આન્તરઃ ।
દ્યાવાપૃથ્વી ઉભે અસ્મિન્નન્તરેવ સમાહિતે ॥ ૭॥

ઉભાવગ્નિશ્ચ વાયુશ્ચ સૂર્યાચન્દ્રમસાવુભૌ ।
નક્ષત્રાણિ ચ વિદ્યુચ્ચ યચ્ચાસ્તિત્વેન ભાસતે ॥ ૮॥

યચ્ચ નાસ્તિતયા ભાતિ સર્વં તસ્મિન્સમાહિતમ્ ।
અતઃ સર્વાશ્રયઃ શમ્ભુઃ સર્વવ્યાપી સ્વભાવતઃ ॥ ૯॥

એષ આત્મા પરો વ્યાપી પાપ્મભિઃ સકલૈઃ સદા ।
અસૌ ચા(ના)પહતઃ સાક્ષી વિમૃત્યુર્વિજરઃ સુરાઃ ॥ ૧૦॥

વિશોકો વિજિઘત્સોઽપિપાસઃ સત્યાદિલક્ષણઃ ।
સત્યકામસ્તથા સત્યસઙ્કલ્પશ્ચ સુરર્ષભાઃ ॥ ૧૧॥

યથા કર્મજિતા લોકાઃ ક્ષીયન્તે ભુવિ સત્તમાઃ ।
તથા પુણ્યજિતા લોકાઃ ક્ષીયન્તે હિ પરત્ર ચ ॥ ૧૨॥

યેઽવિદિત્વા પરાત્માનં વ્રજન્તિ સકલાઃ ક્રિયાઃ ।
તેષાં સર્વેષુ લોકેષુ કામચારો ન વિદ્યતે ॥ ૧૩॥

યે વિદિત્વા પરાત્માનં વ્રજન્તીવ ક્રિયાઃ સ્થિતાઃ ।
તેષાં સર્વેષુ લોકેષુ કામચારસ્તુ વિદ્યતે ॥ ૧૪॥

યથા હિરણ્યં નિહિતં ક્ષેત્રજ્ઞાનવિવર્જિતાઃ ।
ઉપર્યુપરિ ગચ્છન્ત્યો ન વિન્દેયુઃ પ્રજા ઇમાઃ ॥ ૧૫॥

તથા સુષુપ્તૌ ગચ્છન્તો બ્રહ્મલોકં સ્વયમ્પ્રભમ્ ।
ન વિન્દન્તિ મહામોહાદહો મોહસ્ય વૈભવમ્ ॥ ૧૬॥

અયં હૃદિ સ્થિતઃ સાક્ષી સર્વેષામવિશેષતઃ ।
તેનાયં હૃદયં પ્રોક્તં શિવઃ સંસારમોચકઃ ॥ ૧૭॥

ય એવં વેદ સ સ્વર્ગં લોકમેતિ ન સંશયઃ ।
અસ્માચ્છરીરાદુત્થાય સુષુપ્તૌ યઃ સુરર્ષભાઃ ॥ ૧૮॥

પરં જ્યોતિઃસ્વરૂપં તં શિવં સમ્પદ્યતે સુરાઃ ।
અભિનિષ્પદ્યતે સ્વેન રૂપેણૈવ સ્વભાવતઃ ॥ ૧૯॥

એષ આત્મા ન ચૈવાન્યઃ સત્યમેવ મયોદિતમ્ ।
એતદેવામૃતં સાક્ષાદભયં બ્રહ્મ હે સુરાઃ ॥ ૨૦॥

ય આત્મા દહરાકાશઃ સ સેતુર્વિધૃતિઃ સુરાઃ ।
અસમ્ભેદાય લોકાનામેષામેતં મહેશ્વરમ્ ॥ ૨૧॥

અહોરાત્રે ન તરતો ન મૃત્યુર્ન જરાઽપિ ચ ।
ન શોકો નૈવ સુકૃતં ન દુષ્કૃતમપીશ્વરાઃ ॥ ૨૨॥

અતઃ સર્વે નિવર્તન્તે પાપ્માનઃ સુરપુઙ્ગવાઃ ।
એષોઽપહતપાપ્મા હિ બ્રહ્મલોકઃ સ્વયમ્પ્રભઃ ॥ ૨૩॥

તસ્માદ્વૈ સેતુમેતં તુ તીર્ત્વાઽન્ધઃ સન્સુરર્ષભાઃ ।
ભવત્યનન્ધો વિદ્ધઃ સન્નવિદ્ધસ્તદ્વદેવ તુ ॥ ૨૪॥

ય એષો દહરાકાશ ઇત્યુક્તઃ પરમેશ્વરઃ ।
સ દેહાદિવિશેષેભ્યઃ પૃથગ્ભૂતઃ સનાતનઃ ॥ ૨૫॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાખ્યાઽવસ્થા યા ભાતિ દેહિનામ્ ।
તસ્યા અપિ મહાદેવઃ સાક્ષી ભિન્નઃ સ્વયમ્પ્રભઃ ॥ ૨૬॥

તસ્મિન્નધ્યસ્તરૂપેણ સા વિભાતિ ન ભાતિ ચ ॥ ૨૭॥

સ્વદૃશ્યેન શરીરેણ સશરીરસ્ય સર્વદા ।
પ્રિયાપ્રિયાભ્યાં સમ્બન્ધો ભવત્યેવ ન સંશયઃ ॥ ૨૮॥

અશરીરં વાવ સન્તં વિદ્યયા ન પ્રિયાપ્રિયે ।
સ્પૃશતઃ સત્યમેવોક્તં નાત્ર સન્દેહકારણમ્ ॥ ૨૯॥

ય એષ દહરાકાશઃ સ એવ સુરપુઙ્ગવાઃ ।
નામરૂપસ્ય નિર્માતા તદેવ બ્રહ્મ શાશ્વતમ્ ॥ ૩૦॥

અમૃતં ચ તદેવૈતત્સ આત્મા સર્વદેહિનામ્ ।
તતો નાન્યત્પરં કિઞ્ચિન્નાપરં ચાસ્તિ કિઞ્ચન ॥ ૩૧॥

સ એવ સર્વરૂપેણ વિભાતિ ન વિભાતિ ચ ।
અહો રુદ્રસ્ય દેવસ્ય પૂર્ણતા કો નુ વેદ તામ્ ॥ ૩૨॥

યથા મૃત્સ્વવિકારેષુ તત્તદ્રૂપેણ સંસ્થિતા ।
તથા સર્વત્ર તત્સાક્ષી તત્તદ્રૂપેણ સંસ્થિતઃ ॥ ૩૩॥

યથા વારિવિકારેષુ જલં તત્તત્સ્વરૂપતઃ ।
તથા સર્વત્ર તત્સાક્ષી તત્તદ્રૂપેણ સંસ્થિતઃ ॥ ૩૪॥

યથાઽગ્નિઃ સ્વવિકારેષુ તત્તદ્રૂપેણ સંસ્થિતઃ ।
તથા સર્વત્ર તત્સાક્ષી તત્તદ્રૂપેણ સંસ્થિતઃ ॥ ૩૫॥

યથા વા સ્વવિકારેષુ વાયુસ્તત્તત્સ્વરૂપતઃ ।
તથા સર્વત્ર તત્સાક્ષી તત્તદ્રૂપેણ સંસ્થિતઃ ॥ ૩૬॥

યથા વા સર્વગં વ્યોમ સ્વાકારાણૈવ સંસ્થિતમ્ ।
તથા સર્વાત્મકઃ સાક્ષી સાક્ષિરૂપેણ સંસ્થિતઃ ॥ ૩૭॥

ઘટાકાશાદિભેદેન વિભિન્નોઽપ્યવિભાગવાન્ ।
આકાશસ્તદ્વદીશાનો  વિભિન્નોઽપ્યવિભાગવાન્ ॥ ૩૮॥

મહાદેવોઽવિભાગેન વિભાગેન ચ ભાસતે ।
અન્યથા ચેન્મહાદેવો મહાદેવઃ કથં ભવેત્ ॥ ૩૯॥

મહાદેવો મહાદેવ એવ નૈવામહાનયમ્ ।
તથા સતિ મહાદેવ એવ સર્વં ન ચાપરમ્ ॥ ૪૦॥

યેન કેનાપિ રૂપેણ યદ્યદ્ભાતિ ન ભાતિ ચ ।
તેન તેનૈવ રૂપેણ શિવ એવાવભાસતે ॥ ૪૧॥

યથાભાતેન રૂપેણ શિવ એવેતિ યા મતિઃ ।
સા શિવા પરમા સંવિન્નાપરા ન હિ સંશયઃ ॥ ૪૨॥

અહમિતિ શિવસત્યચિદ્ઘનઃ
    સ્ફુરતિ સદા પૃથગસ્તિ નૈવ વસ્તુ ।
ઇદમિતિ વપુષા ચ તેન બન્ધનં
    ન હિ મનુજસ્ય વિમોચનં ચ કિઞ્ચિત્ ॥ ૪૩॥

શિવ ઇતિ સકલં યદા વિભાસતે
    ન ચ મરણં જનનં તદાઽસ્તિ કિઞ્ચિત્ ।
ઇતિ હૃદયે વચનં મદીયમેત-
    ન્નિશિતમતિઃ સતતં નિધાય તિષ્ઠેત્ ॥ ૪૪॥

પરમશિવઃ પરમેશ્વરઃ પ્રસન્નો
    યદિ વિમલા પરમાનુભૂતિરેષા ।
ન હિ સકલૈર્વિમલૈરુપાયવૃન્દૈ-
    ર્ન ચ હરિણા ન મયા ન ચાપરેણ ॥ ૪૫॥

પરમશિવઃ પરમેશ્વરઃ સ્વતન્ત્રો
    યદિ કુરુતે મનુજસ્ય વેદનં હિ તત્ ।
પરમપદં વિમલં પ્રયાતિ મર્ત્યો
    યદિ કુરુતે ન શિવઃ પ્રયાતિ બન્ધમ્ ॥ ૪૬॥

દિનકરકિરણૈર્હિ શાર્વરં તમો
    નિબિડતરં ઝટિતિ પ્રણાશમેતિ ।
ઘનતરભવકારણાન્તરં તમઃ
    શિવદિનકૃત્પ્રભયા ન ચાપરેણ ॥ ૪૭॥

હરિરહમપ્યપરે સુરાસુરાદ્યાઃ
    પરમશિવપ્રભયા તિરસ્કૃતાશ્ચ ।
રવિકિરણૈરખિલાન્યહાનિ યદ્વત્
    પરમશિવઃ સ્વત એવ બોધકારી ॥ ૪૮॥

શિવચરણસ્મરણેન પૂજયા ચ
    સ્વકતમસઃ પરિમુચ્યતે હિ જન્તુઃ ।
ન હિ મરણપ્રભવપ્રણાશહેતુઃ

શિવચરણસ્મરણાદૃતેઽસ્તિ કિઞ્ચિત્ ॥ ૪૯॥

પરમશિવઃ ખલુ નઃ સમસ્તહેતુઃ
પરમશિવઃ ખલુ નઃ સમસ્તમેતત્ ।
પરમશિવઃ ખલુ નઃ સ્બરૂપભૂતઃ
પરમશિવઃ ખલુ નઃ પ્રમાણભૂતઃ ॥ ૫૦॥

પરમશિવઃ સકલાગમાદિનિષ્ઠઃ
પરમશિવઃ પરમાનુભૂતિગમ્યઃ ।
પરમશિવઃ પરમાનુભૂતિરૂપઃ
પરમશિવઃ પરમાનુભૂતિદશ્ચ ॥ ૫૧॥

પરમશિવસમુદ્રેઽહં હરિઃ સર્વદેવા
મનુજપશુમૃગાદ્યાઃ શીકરા એવ સત્યમ્ ।
વિમલમતિભિરેવં વેદવેદાન્તનિષ્ઠૈ-
ર્હૃદયકુહરનિષ્ઠં વેદિતું શક્યતે હિ ॥ ૫૨॥

માયાબલેનૈવ હરિં શિવેન
સમાનમાહુઃ પુરુષાધમાશ્ચ ।
મોહેન કેચિન્મમ સામ્યમાહુ-
ર્માયા તુ શૈવી ખલુ દુસ્તરેયમ્ ॥ ૫૩॥

ખદ્યોતો યદિ ચણ્ડભાનુસદૃશસ્તુલ્યો હરિઃ શમ્ભુના
કિમ્પાકો યદિ ચન્દનેન સદૃશસ્તુલ્યોઽહમીશેન ચ ।
અજ્ઞાનં યદિ વેદનેન સદૃશં દેવેન તુલ્યા જનાઃ
કિં વક્ષ્યે સુરપુઙ્ગવા અહમહો મોહસ્ય દુશ્ચેષ્ટિતમ્ ॥ ૫૪॥

અતઃ શિવેનૈવ સમસ્તમેત-
દ્ભવત્યનન્તેન ન ચાપરેણ ।
શિવસ્વભાવેન શિવઃ સમસ્તં
શિવપ્રભાવેન જગદ્વિચિત્રમ્ ॥ ૫૫॥

તત્ત્વદૃક્સકલમદ્વયં સદા
પશ્યતિ સ્મ પરિમોહિતઃ પુમાન્ ।
કષ્ટશિષ્ટઘટકુડ્યરૂપતઃ
કષ્ટમેવ ખલુ તસ્ય વેદનમ્ ॥ ૫૬॥

ઇદં જગદિતિ સ્વતઃ સકલજન્તોઃ પ્રતીતિર્દૃઢા
પરં જગદિતિ સ્ફુરત્યમલબોધસ્વભાવેન ચ ।
ઇદં હિ પરિવેદનં વિમલચિત્તસ્ય પુંસઃ સદા
ભવં તરતિ માનવઃ પરમબોધેન ચૈતેન હિ ॥ ૫૭॥

છન્દોગશ્રુતિમસ્તકે વિનિહિતં વિજ્ઞાનમેતન્મયા
જન્તૂનામવિવેકિનામતિતરામજ્ઞાનવિધ્વસ્તયે ।
કારુણ્યાદમરાધિપા અતિશુભબ્રહ્મામૃતાવાપ્તયે
દેવાનામધિપાધિપસ્ય વચનાદુક્તં મહેશસ્ય ચ ॥ ૫૮॥

ઇતિ બ્રહ્મગીતાસૂપનિષત્સુ દહરોપાસનવિવરણં
નામ ષષ્ઠોઽધ્યાયઃ ॥ ૬॥

---

॥ અથ સપ્તમોઽધ્યાયઃ ॥

॥ વસ્તુસ્વરૂપવિચારઃ ॥

બ્રહ્મોવાચ ।
અસ્તિ તત્ત્વં પરં સાક્ષાદક્ષરં ક્ષરવસ્તુનામ્ ।
અધિષ્ઠાનમનૌપમ્યમવાઙ્મનસગોચરમ્ ॥ ૧॥

તસ્મિન્સુવિદિતે સર્વં વિજ્ઞાતં સ્યાદિદં સુરાઃ ।
તદાત્મકત્વાત્સર્વસ્ય નાસ્ત્યેવ હિ ભિદા સ્વતઃ ॥ ૨॥

દ્વે વિદ્યે વેદિતવ્યે હિ પરા ચૈવાપરાપિ ચ ।
તત્રાપરા તુ વિદ્યૈષા ઋગ્વેદો યજુરેવ ચ ॥ ૩॥

સામવેદસ્તથાઽથર્વવેદઃ શિક્ષા સુરર્ષભાઃ ।
કલ્પો વ્યાકરણં ચૈવ નિરુક્તં છન્દ એવ ચ ।
જ્યોતિષં ચ તથાઽનાત્મવિષયા અપિ બુદ્ધયઃ ॥ ૪॥

અથૈષા પરવિદ્યા સા યયા તત્પરમક્ષરમ્ ।
ગમ્યતે સુદૃઢં પ્રાજ્ઞૈઃ સાક્ષાચ્છમ્ભોઃ પ્રસાદિભિઃ ॥ ૫॥

યત્તદદ્રેશ્યમગ્રાહ્યમગોત્રં રૂપવર્જિતમ્ ।
અચક્ષુઃ શ્રોત્રમત્યર્થં તદપાણિપદં સદા ॥ ૬॥

નિત્યં વિભું સર્વગતં સુસૂક્ષ્મં ચ તદવ્યયમ્ ।

યદ્ભૂતયોનિં ધીમન્તઃ પરિપશ્યન્તિ ચાત્મના ॥ ૭॥

યથોર્ણનાભિઃ સૃજતે ગૃહ્ણતે ચ સુરર્ષભાઃ ।
યથા પૃથ્વ્યામોષધયઃ સમ્ભવન્તિ યથા સતઃ ॥ ૮॥

પુરુષાત્કેશલોમાનિ તથા ચૈવાક્ષરાત્સુરાઃ ।
વિશ્વં સમ્ભવતીહૈવ તત્સર્વં સ્વપનોપમમ્ ॥ ૯॥

તપસા ચીયતે બ્રહ્મ તદન્નમભિજાયતે ।
અન્નાત્પ્રાણો મનઃ સત્યં લોકાઃ કર્મસુ ચામૃતમ્ ॥ ૧૦॥

યઃ સર્વજ્ઞઃ સર્વવિદ્યો યસ્ય જ્ઞાનમયં તપઃ ॥ ૧૧॥

તસ્માદેતત્સુરા બ્રહ્મ નામરૂપાન્નપૂર્વકમ્ ।
જાયતે સત્યવત્સ્વપ્નપ્રપઞ્ચોપમમેવ તત્ ॥ ૧૨॥

તદેતદક્ષરં સત્યં તદ્વિજ્ઞાય વિમુચ્યતે ।
કર્મણા નાસ્તિ તત્પ્રાપ્તિઃ સંસારસ્ય વિનાશનમ્ ।
પ્લવા હ્યેતે સુરા યજ્ઞા અદૃઢાશ્ચ ન સંશયઃ ॥ ૧૩॥

એભિરેવ પરં શ્રેય ઇતિ જાનન્તિ યે જનાઃ ।
તે મૂઢા અનિશં મૃત્યું જરાં ચૈવાપિયન્તિ હિ ॥ ૧૪॥

કર્મનિષ્ઠાઃ સ્વયં ધીરા મર્ત્યાઃ પણ્ડિતમાનિનઃ ॥ ૧૫॥

મૂઢા એવ ન વિદ્વાંસસ્તેષાં નાસ્તિ પરા ગતિઃ ।
અન્ધેનૈવ યથા ચાન્ધા નીયમાનાઃ સુદારુણે ॥ ૧૬॥

અન્ધકૂપે પતન્ત્યેવ તથા કર્મરતા જનાઃ ।
કર્મનિષ્ઠા સ્વયં સર્વે કૃતાર્થા ઇતિ મોહિતાઃ ॥ ૧૭॥

અભિમન્યન્તિ તે કર્મક્ષયે વશ્યં પતન્તિ હિ ।
વિના નાસ્તિ પરં જ્ઞાનં તેષાં કૈવલ્યમુત્તમમ્ ॥ ૧૮॥

ઇષ્ટાપૂર્તં મન્યમાના વરિષ્ઠમિતિ યે જનાઃ ।
તે મૂઢાઃ પરમં શ્રેયો નૈવ યાન્તિ ન સંશયઃ ॥ ૧૯॥

અનેકજન્મસંસિદ્ધઃ શ્રૌતસ્માર્તપરાયણઃ ।
અનિત્યમિતિ વિજ્ઞાય જગદ્વૈરાગ્યમાપ્નુયાત્ ॥ ૨૦॥

જ્ઞાનાદેવ હિ સંસારવિનાશો નૈવ કર્મણા ।

ઇતિ જ્ઞાત્વા શિવજ્ઞાનસિદ્ધ્યર્થં પુનરાસ્તિકાઃ ॥ ૨૧॥

શ્રોત્રિયં બ્રહ્મનિષ્ઠં ચ ગુરું ગચ્છેત્પ્રિયેણ ચ ।
ગુરુસ્તસ્મૈ પરાં વિદ્યાં દદ્યાચ્ચ સુરપુઙ્ગવાઃ ॥ ૨૨॥

વિસ્ફુલિઙ્ગા યથા ચાગ્નેઃ સુદીપ્તાત્પ્રભવન્તિ ચ ।
અપિયન્તિ તથા ભાવા અક્ષરે શિવસઞ્જ્ઞકે ॥ ૨૩॥

દિવ્યો હ્યમૂર્તઃ પુરુષઃ સબાહ્યાભ્યન્તરો હ્યજઃ ।
અપ્રાણો હ્યમનાઃ શુભ્રો માયાયા જીવતઃ પરઃ ॥ ૨૪॥

એતસ્માજ્જાયતે પ્રાણો મનઃ સર્વેન્દ્રિયાણિ ચ ।
ખં વાયુર્જ્યોતિરાપશ્ચ ભૂમિર્વિશ્વસ્ય ધારિણી ॥ ૨૫॥

અગ્નિર્મૂર્ધા ચક્ષુષી ચન્દ્રસૂર્યૌ
    દિશઃ શ્રોત્રે વાગ્વિવૃતાશ્ચ વેદાઃ ।
વાયુઃ પ્રાણો હૃદયં વિશ્વમસ્ય
    પદ્ભ્યાં ભૂમિઃ શઙ્કરોઽયં હિ સત્યઃ ॥ ૨૬॥

તસ્માદગ્નિઃ સમિધો યસ્ય સૂર્યઃ
    સોમાદ્વૃષ્ટિશ્ચૌષધયઃ પૃથિવ્યામ્ ।
પુમાન્ રેતઃ સિઞ્ચતિ યોષિતાયાં
    બહ્વીઃ પ્રજા બહુધા સમ્પ્રસૂતાઃ ॥ ૨૭॥

તસ્માદૃચઃ સામ યજૂંષિ દીક્ષા
    યજ્ઞાશ્ચ સર્વે ક્રતવો દક્ષિણાશ્ચ ।
સંવત્સરો યજમાનશ્ચ લોકઃ
    સોમો યત્ર પવતે યત્ર સૂર્યઃ ॥ ૨૮॥

તસ્માદ્દેવા બહુધા સમ્પ્રસૂતાઃ
    સાધ્યા મર્ત્યાઃ પશવઃ પક્ષિણશ્ચ ।
પ્રાણાપાનૌ વ્રીહિયવૌ તપશ્ચ
    શ્રદ્ધા સત્યં બ્રહ્મચર્યં વિધિશ્ચ ॥ ૨૯॥

તસ્માત્પ્રાણા અર્ચિષઃ સપ્ત હોમાઃ
    સુરશ્રેષ્ઠાઃ સમિધઃ સપ્ત ચૈવ ।
લોકાઃ સર્વે ચોદ્ભવન્ત્યાશુ પૂર્વં
    યથા તદ્વત્સ્વપ્નતુલ્યં તથાઽપિ ॥ ૩૦॥

અતઃ સમુદ્રા ગિરયશ્ચ નદ્ય-
    સ્તથા સર્વા ઓષધયો રસાશ્ચ ।
સર્વસ્યાત્મા સર્વસાક્ષી પરાત્મા
    નિત્યાનન્દોઽયં પુરાણઃ સુપૂર્ણઃ ॥ ૩૧॥

ઇદં સકલમાસ્તિકાઃ પુરુષ એવ નૈવાપરં
    ન કિઞ્ચિદપરં તતઃ સકલમસ્તિ સત્યં હિ તત્ ।
ઇદં હિ મમ વેદનં મુનિગણસ્ય શમ્ભોર્હરે-
    ર્ન કશ્ચિદપિ સંશયઃ શ્રુતિમતસ્ય યુક્તઃ ખલુ ॥ ૩૨॥

અહો વિષયમાયયા મરણપૂર્વદુઃખોદધૌ
    પતન્તિ મનુજા અમી પરશિવસ્ય વિદ્યાં વિના ।
તરન્તિ જનનાર્ણવં પરશિવસ્ય વિદ્યાબલા-
    દિદં તુ શિવવેદનં શિવપદસ્ય દેવાબલાત્ ॥ ૩૩॥

ગુહાયાં નિહિતં સાક્ષાદક્ષરં વેદ ચેન્નરઃ ।
છિત્ત્વાઽવિદ્યામહાગ્રન્થિં શિવં ગચ્છેત્સનાતનમ્ ॥ ૩૪॥

તદેતદક્ષરં બ્રહ્મ સ પ્રાણસ્તદુ વાઙ્મનઃ ।
તદેતદમૃતં સત્યં તદ્વેદ્ધવ્યં મનીષિભિઃ ॥ ૩૫॥

ધનુસ્તારં શરો હ્યાત્મા બ્રહ્મ તલ્લક્ષ્યમુચ્યતે ।
અપ્રમત્તેન વેદ્ધવ્યં શરવત્તન્મયો ભવેત્ ॥ ૩૬॥

લક્ષ્યં સર્વગતં ચૈવ શરોઽયં સર્વતોમુખઃ ।
વેદ્ધા સર્વગતશ્ચૈવ વિદ્ધં લક્ષ્યં ન સંશયઃ ॥ ૩૭॥

આત્માનમરણિં કૃત્વા પ્રણવં ચોત્તરારણિમ્ ।
ધ્યાનનિર્મથનાભ્યાસાદ્દેવ પશ્યેન્નિગૂઢવત્ ॥ ૩૮॥

દ્યૌરન્તરિક્ષં ભૂમિશ્ચ મનઃ પ્રાણઃ સુરોત્તમાઃ ।
યસ્મિન્નોતં તમેવૈકં વિદ્યાત્પ્રાજ્ઞઃ સમાહિતઃ ॥ ૩૯॥

બ્રહ્મૈકવિષયાં વાચં વદેત્સતતમાસ્તિકાઃ ।
અન્યા વાચસ્ત્યજેદેષ સેતુરેવામૃતસ્ય ચ ॥ ૪૦॥

યઃ સર્વજ્ઞઃ સર્વવિદ્યો યસ્યૈષ મહિમા ભુવિ ।
દિવ્યે બ્રહ્મપુરે વ્યોમ્નિ શિવઃ સાક્ષાત્પ્રતિષ્ઠિતઃ ॥ ૪૧॥

મનોમયઃ પ્રાણશરીરનેતા
    પ્રતિષ્ઠિતઃ સર્વહૃદમ્બુજાન્તઃ ।
તદ્વિજ્ઞાનેન પરિમુચ્યન્તિ ધીરા
    યદ્ભાતિ ચાનન્દવપુઃ સ્વભાવાત્ ॥ ૪૨॥

ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્દૃષ્ટે પરાવરે ॥ ૪૩॥

હિરણ્મયે પરે કોશે વિરજં બ્રહ્મ નિષ્કલમ્ ।
તચ્છુભ્રં જ્યોતિષાં જ્યોતિસ્તદ્યદાત્મવિદો વિદુઃ ॥ ૪૪॥

ન તત્ર સૂર્યશ્ચન્દ્રશ્ચ તારકા વિદ્યુતોઽનલઃ ।
વિભાન્તિ શઙ્કરે સાક્ષાત્સ્વયમ્ભાને ચિદાત્મકે ॥ ૪૫॥

તમેવ સકલં ભાન્તમનુભાતિ સ્વભાવતઃ ।
તસ્ય ભાસા સર્વમિદં વિભાતિ તત એવ હિ ॥ ૪૬॥

ન તત્ર ચન્દ્રાર્કવપુઃ પ્રકાશતે
    ન વાન્તિ વાતાઃ સકલાશ્ચ દેવતાઃ ।
સ એષ દેવઃ કૃતભૂતભાવનઃ
    સ્વયં વિશુદ્ધો વિરજઃ પ્રકાશતે ॥ ૪૭॥

બ્રહ્મૈવેદમમૃતં તત્પુરસ્તા-
    દ્બ્રહ્માનન્તં પરમં ચૈવ પશ્ચાત્ ।
બ્રહ્માનન્તં પરમં દક્ષિણે ચ
    બ્રહ્માનન્તં પરમં ચોત્તરે ચ ॥ ૪૮॥

દ્વૌ સુપર્ણૌ શરીરેઽસ્મિન્
    જીવેશાખ્યૌ સહ સ્થિતૌ ।
તયોર્જીવઃ ફલં ભુઙ્ક્તે
    કર્મણો ન મહેશ્વરઃ ॥ ૪૯॥

કેવલં સાક્ષિરૂપેણ વિના ભોગં મહેશ્વરઃ ।
પ્રકાશતે સ્વયમ્ભેદઃ કલ્પિતો માયયા તયોઃ ॥ ૫૦॥

યથાકાશો ઘટાકાશમહાકાશમભેદતઃ ।
કલ્પિતઃ પરચિજ્જીવઃ શિવરૂપેણ કલ્પિતઃ ॥ ૫૧॥

તત્ત્વતશ્ચિચ્છિવઃ સાક્ષાચ્ચિજ્જીવશ્ચ તતઃ સદા ।

ચિચ્ચિદાકારતોऽભિન્ના ન ભિન્ન ચિત્ત્વહાનિતઃ ॥ ૫૨॥

ચિતશ્ચિન્ન ચિદાકારાદ્ભિદ્યતે જડરૂપતઃ ।
ભિદ્યતે ચેજ્જડે ભેદશ્ચિદેકા સર્વદા ખલુ ॥ ૫૩॥

તર્કતશ્ચ પ્રમાણાચ્ચ ચિદેકત્વે વ્યવસ્થિતે ।
અપિ પાપવતાં પુંસાં વિપરીતા મતિર્ભવેત્ ॥ ૫૪॥

શ્રૌતસ્માર્તસમાચારૈર્વિશુદ્ધસ્ય મહાત્મનઃ ।
પ્રસાદાદેવ રુદ્રસ્ય ચિદેકત્વે મતિર્ભવેત્ ॥ ૫૫॥

ચિદેકત્વપરિજ્ઞાનાન્ન શોચતિ ન મુહ્યતિ ।
અદ્વૈતં પરમાનન્દં શિવં યાતિ તુ કેવલમ્ ॥ ૫૬॥

શિવસ્થાને શરીરેऽસ્મિન્સ્થિતોऽપિ સ્વાત્મમાયયા ।
દુઃખાદિસાગરે મગ્નો મુહ્યમાનશ્ચ શોચતિ ॥ ૫૭॥

સ્વસ્માદન્યતયા ભાતમીશં સ્વેનૈવ સેવિતમ્ ।
અધિષ્ઠાનં સમસ્તસ્ય જગતઃ સત્યચિદ્ઘનમ્ ॥ ૫૮॥

અહમસ્મીતિ નિશ્ચિત્ય વીતશોકો ભવત્યયમ્ ।
અસ્ય ચિન્માત્રરૂપસ્ય સ્વસ્ય સર્વસ્ય સાક્ષિણઃ ॥ ૫૯॥

મહિમાનં યદા વેદ પરમાદ્વૈતલક્ષણમ્ ।
તદૈવ વિદ્યયા સાક્ષાદ્વીતશોકો ભવત્યયમ્ ॥ ૬૦॥

બ્રહ્મયોનિં સદા પૂર્ણં રુક્મવર્ણં મહેશ્વરમ્ ।
અપશ્યન્નેવ પશ્યન્તં કર્તૃત્વેન પ્રકાશિતમ્ ॥ ૬૧॥

અનેકકોટિભિઃ કલ્પૈરર્જિતૈઃ પુણ્યકર્મભિઃ ।
તર્કતશ્ચ પ્રમાણાચ્ચ પ્રસાદાત્પરમેશ્વરાત્ ॥ ૬૨॥

પશ્યતિ શ્રદ્ધયા ચાપિ યદા વિદ્વાન્સુરર્ષભાઃ ।
પુણ્યપાપે વિધૂયાયમસક્તઃ સર્વહેતુભિઃ ॥ ૬૩॥

સર્વાકારતયા સામ્યં પરમાદ્વૈતલક્ષણમ્ ।
ઉપૈતિ નાત્ર સન્દેહઃ કર્તવ્યશ્ચ મનીષિભિઃ ॥ ૬૪॥

ચિન્માત્રં હિ સદા રૂપમુભયોઃ શિવજીવયોઃ ।
તથા સતિ કથં સામ્યં ચિન્માત્રે ભેદવર્જિતે ॥ ૬૫॥

ઉપાધિયુક્તરૂપે તુ તયોઃ સામ્યં ભવેદ્યદિ ।
તદાઽપિ નૈવ સામ્યં સ્યાજ્જીવસ્ય પરમાત્મનઃ ॥ ૬૬॥

મહાકાશસમત્વં તુ ઘટાકાશસ્ય સર્વથા ।
યથા નાસ્તિ તથા સામ્યં ન જીવસ્ય શિવેન તુ ॥ ૬૭॥

અસ્તુ વા સામ્યમીશેન જીવસ્યાસ્ય તદાઽપિ તુ ।
કર્મણા વિદ્યયા વા તત્સામ્યં સિધ્યતિ નાન્યથા ॥ ૬૮॥

કર્મણા ચેદ્વિનાશઃ સ્યાત્કર્મસાધ્યં હિ નશ્વરમ્ ।
વિદ્યયૈવ તુ ચેત્સામ્યં પુરસ્તાદેવ ચાસ્તિ હિ ॥ ૬૯॥

પુરસ્તાદેવ સિદ્ધસ્ય બોધકં ખલુ વેદનમ્ ।
અભૂતાર્થસ્ય ચોત્પત્તિં ન કરોતિ કદાચન ॥ ૭૦॥

તત્રૈવં સતિ સામ્યં તુ તયોઃ સર્વાત્મનૈવ તુ ।
પુરસ્તાદેવ ચાસ્ત્યેવ તદાઽપિ શિવજીવયોઃ ॥ ૭૧॥

પુરસ્તાદેવ કૈવલ્યં લક્ષણૈકત્વતોઽસ્તિ ચ ।
તથા સતિ શિવો ભિન્નો વિદ્યયાઽભિન્નવત્સ્થિતઃ ॥ ૭૨॥

વિદ્યયા તદ્વિનાશેન સ્વસામ્યં યાતિ નાન્યથા ।
અતઃ સામ્યં તયોઃ સાક્ષાદૈક્યમેવ ન ચેતરત્ ॥ ૭૩॥

એવં જીવઃ સ્વકં રૂપં શિવં પશ્યતિ ચેદ્દૃઢમ્ ।
સ્વાત્મન્યેવ રતિં ક્રીડામન્યચ્ચ કુરુતે સદા ॥ ૭૪॥

બહિશ્ચેષ્ટા ચ મય્યેવ શિવે સત્યસુખાત્મકે ।
ઇતિ જાનાતિ સર્વં તુ સ્વાત્મનૈવ હિ ભાસતે ॥ ૭૫॥

સ્વાત્મનૈવ સ્વયં સર્વં યદા પશ્યતિ નિર્ભયઃ ।
તદા મુક્તો ન મુક્તશ્ચ બદ્ધસ્ય હિ વિમુક્તતા ॥ ૭૬॥

એવં રૂપા પરા વિદ્યા સત્યેન તપસાઽપિ ચ ।
બ્રહ્મચર્યાદિભિર્ધર્મૈર્લભ્યા વેદોક્તવર્ત્મના ॥ ૭૭॥

શરીરેઽન્તઃ સ્વયઞ્જ્યોતિઃસ્વરૂપં સ્વકમૈશ્વરમ્ ।
ક્ષીણદોષાઃ પ્રપશ્યન્તિ નેતરે માયયાઽઽવૃતાઃ ॥ ૭૮॥

એવં રૂપપરિજ્ઞાનં યસ્યાસ્તિ પરયોગિનઃ ।
કુત્રચિદ્ગમનં નાસ્તિ તસ્ય સમ્પૂર્ણરૂપિણઃ ॥ ૭૯॥

આકાશમેકં સમ્પૂર્ણં કુત્રચિન્નૈવ ગચ્છતિ ।
તદ્વત્સ્વાત્મવિભુત્વજ્ઞઃ કુત્રચિન્નૈવ ગચ્છતિ ॥ ૮૦॥

ન ચક્ષુષા ગૃહ્યતે નાપિ વાચા
નાન્યૈર્દેવૈસ્તપસા કર્મણા વા ।
જ્ઞાનપ્રસાદેન વિશુદ્ધસત્ત્વઃ
સ નિષ્કલં પશ્યતિ રૂપમૈશમ્ ॥ ૮૧॥

ધ્યાનેન પરમેશસ્ય સામ્બમૂર્તિધરસ્ય ચ ।
સ્વનિષ્કલપરિજ્ઞાનં જાયતે નાન્યહેતુના ॥ ૮૨॥

એષ આત્મા સુસૂક્ષ્મોઽપિ વેદિતવ્યોઽગ્ર્યયા ધિયા ।
પઞ્ચધા સન્નિવિષ્ટોઽસુર્યસ્મિન્સર્વાશ્રયે સુરાઃ ॥ ૮૩॥

સંવિભાતિ સ્વચિત્તેન યં યં લોકં વિશુદ્ધધીઃ ।
સદા કામયતે યાંશ્ચ તજ્જયત્યખિલં તતઃ ॥ ૮૪॥

તસ્માદાત્મવિદં સાક્ષાદીશ્વરં ભવતારકમ્ ।
અર્ચયેદ્ભૂતિકામસ્તુ સ્વશરીરેણ ચાર્થતઃ ॥ ૮૫॥

નાયમાત્મા પ્રવચનેન લભ્યો
ન મેધયા ન બહુના શ્રુતેન ।
યમેવૈષ વૃણુતે તેન લભ્ય-
સ્તસ્યૈષ આત્મા વિવૃણુતે તનું સ્વામ્ ॥ ૮૬॥

નાયમાત્મા બલહીનેન લભ્યઃ
પ્રમાદતસ્તપસો નાન્યલિઙ્ગાત્ ।
એતૈર્યત્નં યઃ કરોત્યેવ ધીમાં-
સ્તસ્યાત્માઽયં વિશતે બ્રહ્મ ધામ ॥ ૮૭॥

સમ્પ્રાપ્યૈનમૃષયો જ્ઞાનતૃપ્તાઃ
કૃતાત્માનો વીતશોકાઃ પ્રશાન્તાઃ ।
તે સર્વગં સર્વશઃ પ્રાપ્ય ધીરા
યુક્તાત્માનઃ સર્વમેવાવિશન્તિ ॥ ૮૮॥

વેદાન્તવિજ્ઞાનસુનિશ્ચિતાર્થાઃ
સન્યાસયોગાદ્યતયઃ શુદ્ધસત્ત્વાઃ ।

તે બ્રહ્મલોકે તુ પરાન્તકાલે
    પરામૃતાત્પરિમુચ્યન્તિ સર્વે ॥ ૮૯॥

ગતાઃ કલાઃ પઞ્ચદશ પ્રતિષ્ઠા
    દેવાશ્ચ સર્વે પ્રતિદેવતાશ્ચ ।
કર્માણિ વિજ્ઞાનમયશ્ચ આત્મા
    પરેઽવ્યયે સર્વ એકીભવન્તિ ॥ ૯૦॥

યથા નદ્યઃ સ્યન્દમાનાઃ સમુદ્રે
    અસ્તં યાન્તિ નામરૂપે વિહાય ।
તથા વિદ્વાન્નામરૂપાદ્વિમુક્તઃ
    પરાત્પરં પુરુષં બ્રહ્મ યાતિ ॥ ૯૧॥

સ યો હ વૈ તત્પરમં બ્રહ્મ વેદ સુરર્ષભાઃ ।
બ્રહ્મૈવ ભવતિ જ્ઞાનાન્નાસ્તિ સંશયકારણમ્ ॥ ૯૨॥

સુનિશ્ચિતં પરં બ્રહ્મ વેદ ચેત્સ્વાનુભૂતિતઃ ।
કુલે ભવતિ નાબ્રહ્મવિત્તસ્ય સુરપુઙ્ગવાઃ ॥ ૯૩॥

શોકં તરતિ પાપ્માનં ગુહાગ્રન્થિર્વિનશ્યતિ ।
અમૃતો ભવતિ પ્રાજ્ઞઃ સત્યમેવ મયોદિતમ્ ॥ ૯૪॥

સર્વમુક્તમતિશોભનં મયા
    શોકમોહપટલસ્ય ભેદકમ્ ।
આશુ સત્યસુખબોધવસ્તુદં
    વેદમાનનિરતસ્ય ભાસતે ॥ ૯૫॥

ઇતિ બ્રહ્મગીતાસૂપનિષત્સુ વસ્તુસ્વરૂપવિચારો
નામ સપ્તમોઽધ્યાયઃ ॥ ૭॥

॥ અથ અષ્ટમોઽધ્યાઃ ॥

॥ કૈવલ્યોપનિષદ્વિવરણે તત્ત્વવેદનવિધિઃ ॥

બ્રહ્મોવાચ -
અસ્તિ તત્ત્વં પરં સાક્ષાચ્છિવરુદ્રાદિસંજ્ઞિતમ્ ।
તદવશ્યં મહાયાસાદ્વેદિતવ્યં મનીષિભિઃ ॥ ૧॥

તદ્વિદ્યા યતિભિઃ સેવ્યા નિગૂઢાતીવ શોભના ।
અચિરાત્સર્વપાપઘ્ની પરબ્રહ્મપ્રદા નૃણામ્ ॥ ૨॥

શ્રદ્ધયા પરયા (ચ મહા) ભક્ત્યા ધ્યાનેન ચ સુરોત્તમાઃ ।
યોગેન ચ પરા વિદ્યા લભ્યા સા નૈવ કર્મણા ।
ન પ્રજાભિર્ન ચાર્થેન ત્યાગેનૈષાં સુરર્ષભાઃ ॥ ૩॥

યે વેદાન્તમહાવાક્યશ્રવણોત્પન્નવિદ્યયા ।
સુનિશ્ચિતાર્થા યતયો વિશુદ્ધહૃદયા ભૃશમ્ ॥ ૪॥

બ્રહ્મદૃશ્યે શરીરેઽસ્મિન્નન્તકાલે પરસ્ય તુ ।
અજ્ઞાનાખ્યસ્ય તે સર્વે મુચ્યન્તિ હિ પરામૃતાત્ ॥ ૫॥

અતો વિદ્યાઽઽપ્તિસિદ્ધ્યર્થં મુમુક્ષુર્મતિમત્તમઃ ॥ ૬॥

વિવિક્તં દેશમાશ્રિત્ય સુખાસીનો મહાશુચિઃ ।
સમગ્રીવશિરઃકાયઃ સિતભસ્માવગુણ્ઠિતઃ ॥ ૭॥

ઇન્દ્રિયાણિ સમસ્તાનિ નિરુધ્ય સુરપુઙ્ગવાઃ ।
પ્રણમ્ય સ્વગુરું ભક્ત્યા વિચિન્ત્ય હૃદયામ્બુજમ્ ॥ ૮॥

વિશુદ્ધં વિરજં તસ્ય મધ્યે વિશદમીશ્વરમ્ ।
અનન્તં શુદ્ધમવ્યક્તમચિન્ત્યં સર્વજન્તુભિઃ ॥ ૯॥

શિવં પ્રશાન્તમમૃતં વેદયોનિં સુરર્ષભાઃ ।
આદિમધ્યાન્તનિર્મુક્તમેકં સાક્ષાદ્વિભું તથા ॥ ૧૦॥

અરૂપં સચ્ચિદાનન્દમદ્ભુતં પરમેશ્વરં ।
ઉમાસહાયમોમર્થં પ્રભું સાક્ષાત્ત્રિલોચનમ્ ।
નીલકણ્ઠં પ્રશા(ભા)ન્તસ્તં(સ્થં) ધ્યાયેન્નિત્યમતન્દ્રિતઃ ॥ ૧૧॥

એવં ધ્યાનપરઃ સાક્ષાન્મુનિર્બ્રહ્માત્મવિદ્યયા ॥ ૧૨॥

ભૂતયોનિં સમસ્તસ્ય સાક્ષિણં તમસઃ પરમ્ ।
ગચ્છત્યેવ ન સન્દેહઃ સત્યમુક્તં મયા સુરાઃ ॥ ૧૩॥

યોઽયં ધ્યેયશ્ચ વિજ્ઞેયઃ શિવઃ સંસારમોચકઃ ।
સ બ્રહ્મા સ શિવઃ સેન્દ્રઃ સોઽક્ષરઃ પરમઃ સ્વરાટ્ ॥ ૧૪॥

સ એવ વિષ્ણુઃ સ પ્રાણઃ સ કાલોઽગ્નિઃ સ ચન્દ્રમાઃ ।
સ એવ સર્વં યદ્ભૂતં યચ્ચ ભવ્યં સમાસતઃ ॥ ૧૫॥

સ એવ વિદ્યાવિદ્યા ચ ન તતોઽન્યત્તુ કિઞ્ચન ।
જ્ઞાત્વા તં મૃત્યુમત્યેતિ નાન્યઃ પન્થા વિમુક્તયે ॥ ૧૬॥

સર્વભૂતસ્થમાત્માનં સર્વભૂતાનિ ચાત્મનિ ।
સમ્પશ્યન્બ્રહ્મ પરમં યાતિ નાન્યેન હેતુના ॥ ૧૭॥

આત્માનમરણિં કૃત્વા પ્રણવં ચોત્તરારણિમ્ ।
ધ્યાનનિર્મથનાદેવ પા(શા)પાન્દહતિ પણ્ડિતઃ ॥ ૧૮॥

સ એવ ભગવાનીશો માયયૈવાત્મભૂતયા ।
મુહ્યમાન ઇવ સ્થિત્વા સ્વસ્વાતન્ત્ર્યબલેન તુ ॥ ૧૯॥

શરીરમિદમાસ્થાય કરોતિ સકલં પુનઃ ।
જાગ્રત્સંજ્ઞમિદં ધામ પ્રકલ્પ્ય સ્વીયમાયયા ॥ ૨૦॥

રાજપુત્રાદિવત્તસ્મિન્ક્રીડયા કેવલં હરઃ ।
અન્નપાનાદિભિઃ સ્ત્રીભિસ્તૃપ્તિમેતિ સુરર્ષભાઃ ॥ ૨૧॥

સ્વપ્નકાલે તથા શમ્ભુર્જીવત્વેન પ્રકાશિતઃ ।
સુખદુઃખાદિકાન્ભોગાન્ભુઙ્ક્તે સ્વેનૈવ નિર્મિતાન્ ॥ ૨૨॥

સુષુપ્તિકાલે સકલે વિલીને તમસાઽઽવૃતઃ ।
સ્વસ્વરૂપમહાનન્દં ભુઙ્ક્તે વિશ્વ(દૃશ્ય)વિવર્જિતઃ ॥ ૨૩॥

પુનઃ પૂર્વક્રિયાયોગાજ્જીવત્વેન પ્રકાશિતઃ ।
જાગ્રત્સંજ્ઞમિદં ધામ યાતિ સ્વપ્નમથાપિ વા ॥ ૨૪॥

પુરત્રયમિદં પુંસો ભોગાયૈવ વિનિર્મિતમ્ ।
ભોગશ્ચાસ્ય સદા ક્રીડા ન દુઃખાય કદાચન ॥ ૨૫॥

વિશ્વાધિકો મહાનન્દઃ સ્વતન્ત્રો નિરુપદ્રવઃ ।
અસક્તઃ સર્વદોષૈશ્ચ કથં દુઃખી ભવેદ્ધરઃ ॥ ૨૬॥

સ ન જીવઃ શિવાદન્યો યો ભુઙ્ક્તે કર્મણાં ફલમ્ ।
ભેદાભાવાચ્ચિતશ્ચેત્યં ન કર્મફલમર્હતિ ॥ ૨૭॥

અતઃ સર્વજગત્સાક્ષી ચિદ્રૂપઃ પરમેશ્વરઃ ।
અદ્વિતીયો મહાનન્દઃ ક્રીડયા ભોગમર્હતિ ॥ ૨૮॥

ધામત્રયમિદં શમ્ભોર્ન દુઃખાય કદાચન ।

ક્રીડારામતયા ભાતિ ન ચોદ્યાર્હો મહેશ્વરઃ ॥ ૨૯॥

ઇદં ધામત્રયં શમ્ભોર્વિભેદેન ન વિદ્યતે ।
શમ્ભુરેવ તથા ભાતિ ન હ્યન્યત્પરમેશ્વરાત્ ॥ ૩૦॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાખ્યાવસ્થારૂપેણ ભાતિ યઃ ।
સ વિશ્વતૈજસપ્રાજ્ઞસમાખ્યાઃ ક્રમશો ભવેત્ ॥ ૩૧॥

વિશ્વો હિ સ્થૂલભુઙ્નિત્યં તૈજસઃ પ્રવિવિક્તભુક્ ।
પ્રાજ્ઞસ્ત્વાનન્દભુક્સાક્ષી કેવલઃ સુખલક્ષણઃ ॥ ૩૨॥

ત્રિષુ ધામસુ યદ્ભોગ્યં ભોક્તા યશ્ચ પ્રકીર્તિતઃ ।
ઉભયં બ્રહ્મ યો વેદ સ ભુઞ્જાનો ન લિપ્યતે ॥ ૩૩॥

અશ્વમેધસહસ્રાણિ બ્રહ્મહત્યાશતાનિ ચ ।
કુર્વન્નપિ ન લિપ્યેત યદ્યેકત્વં પ્રપશ્યતિ ॥ ૩૪॥

જીવરૂપ ઇવ સ્થિત્વા યઃ ક્રીડતિ પુરત્રયે ।
સ ન જીવઃ સદા શમ્ભુઃ સત્યમેવ ન સંશયઃ ॥ ૩૫॥

તતસ્તુ જાતં સકલં વિચિત્રં સત્યવત્સુરાઃ ।
સ સત્યોઽસત્યસાક્ષિત્વાત્સાક્ષિત્વાચ્ચિત્સુખં તથા ॥ ૩૬॥

પ્રેમાસ્પદત્વાદદ્વૈતો ભેદાભાવાત્સુરર્ષભાઃ ।
તસ્મિન્નૈવ લયં યાતિ પુરત્રયમિદં તતઃ ॥ ૩૭॥

ન જીવો જીવવદ્ભાતિ સાક્ષાદ્બ્રહ્મૈવ કેવલમ્ ।
અજ્ઞાનાજ્જીવરૂપેણ ભાસતે ન સ્વભાવતઃ ॥ ૩૮॥

બ્રહ્મણો જાયતે પ્રાણો મનઃ સર્વેન્દ્રિયાણિ ચ ।
ખં વાયુર્જ્યોતિરાપશ્ચ ભૂમિર્વિશ્વસ્ય ધારિણી ॥ ૩૯॥

યત્પરં બ્રહ્મ સર્વાત્મા વિશ્વસ્યાયતનં મહત્ ।
સૂક્ષ્માત્સૂક્ષ્મતમં નિત્યં તત્ત્વંશબ્દાર્થ એવ હિ ॥ ૪૦॥

યસ્ત્વંશબ્દસ્ય લક્ષ્યાર્થઃ સ તચ્છબ્દાર્થ એવ હિ ।
તત્ત્વંશબ્દૌ સ્વતઃસિદ્ધે ચિન્માત્રે પર્યવસ્યતઃ ॥ ૪૧॥

યઃ પદદ્વયલક્ષ્યાર્થસ્તસ્મિન્ભેદઃ પ્રકલ્પિતઃ ।
માયાવિદ્યાત્મકોપાધિભેદેનૈવ ન વસ્તુતઃ ॥ ૪૨॥

સ્વતઃસિદ્ધૈકતાજ્ઞાનં વ્યુદસ્ય શ્રુતિરાદરાત્ ।
સ્વભાવસિદ્ધમેકત્વં બોધયત્યધિકારિણઃ ॥ ૪૩॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાદિપ્રપઞ્ચત્વેન ભાતિ યત્ ।
તદ્બ્રહ્માહમિતિ જ્ઞાત્વા સર્વબન્ધૈઃ પ્રમુચ્યતે ॥ ૪૪॥

યસ્તુ બ્રહ્મ વિજાનાતિ સ્વાત્મના સુદૃઢં નરઃ ।
તસ્ય સ્વાનુભવસ્ત્વેવં સ્વભાવાદનુવર્તતે ॥ ૪૫॥

ત્રિષુ ધામસુ યદ્ભોગ્યં ભોક્તા ભોગશ્ચ યસ્તથા ।
તેભ્યો વિલક્ષણઃ સાક્ષી ચિન્માત્રોઽહં સદાશિવઃ ॥ ૪૬॥

મય્યેવ સકલં જાતં મયિ સર્વં પ્રતિષ્ઠિતમ્ ।
મયિ સર્વં લયં યાતિ તદ્બ્રહ્માદ્વયમસ્મ્યહમ્ ॥ ૪૭॥

અણોરણીયાનહમેવ તદ્વ-
    ન્મહાનહં વિશ્વમહં વિશુદ્ધઃ ।
પુરાતનોઽહં પુરુષોઽહમીશો
    હિરણ્મયોઽહં શિવરૂપમસ્મિ ॥ ૪૮॥

અપાણિપાદોઽહમચિન્ત્યશક્તિઃ
    પશ્યામ્યચક્ષુશ્ચ શ◌ૃણોમ્યકર્ણઃ ।
અહં વિજાનામિ વિવિક્તરૂપો
    ન ચાસ્તિ વેત્તા મમ ચિત્સદાઽહમ્ ॥ ૪૯॥

વેદૈરનેકૈરહમેવ વેદ્યો
    વેદાન્તકૃદ્વેદવિદેવ ચાહમ્ ।
ન પુણ્યપાપે મમ નાસ્તિ નાશો
    ન જન્મ દેહેન્દ્રિયબુદ્ધયશ્ચ ॥ ૫૦॥

ન ભૂમિરાપો મમ નૈવ વહ્નિ-
    ર્ન ચાનિલો મેઽસ્તિ ન ચામ્બરં ચ ।
સદાઽહમેવાહમિતિ સ્ફુરામિ
    સ્વભાવતશ્ચેદમિતિ સ્ફુરામિ ॥ ૫૧॥

અભાતરૂપેણ તથૈવ સર્વદા
    વિભાતરૂપેણ ચ ભાનરૂપતઃ ।
અભાનરૂપેણ ચ સર્વરૂપતઃ

સ્ફુરામિ દેવોઽહમતઃ પુરાતનઃ ॥ ૫૨॥

એવં વિદિત્વા પરમાત્મરૂપં
ગુહાશયં નિષ્કલમદ્વિતીયમ્ ।
સમસ્તભાનં સદસદ્વિહીનં
પ્રયાતિ શુદ્ધં પરમાત્મરૂપમ્ ॥ ૫૩॥

અતશ્ચ વેદાન્તવચોભિરઞ્જસા
મુમુક્ષુભિર્નિત્યમશેષનાયકઃ ।
ગુરૂપદેશેન ચ તર્કતસ્તથા
વિચિન્તનીયશ્ચ વિશેષતઃ શિવઃ ॥ ૫૪॥

કૈવલ્યોપનિષત્પરા પરકૃપાયુક્તા યદુચ્ચૈર્મુદા
પ્રોવાચ પ્રતિતૌજસૈરપિ હરિબ્રહ્માદિભિશ્ચાદૃતમ્ ।
હે દેવા અહમુક્તવાનતિશુભબ્રહ્માપરોક્ષાય ત-
ત્સર્વેષામધિકારિણાં મતમિદં વિત્તાતિભક્ત્યા સહ ॥ ૫૫॥

ઇતિ બ્રહ્મગીતાસૂપનિષત્સુ કૈવલ્યોપનિષદ્વિવરણે
તત્ત્વવેદનવિધિર્નામાષ્ટમોઽધ્યાયઃ ॥ ૮॥

॥ અથ નવમો।ધ્યાયઃ ॥

॥ બૃહાદારણ્યકોપનિષદ્વ્યાખ્યાનમ્ ॥

બ્રહ્મોવાચ ।
પ્રત્યગ્રૂપઃ શિવઃ સાક્ષાત્પરાનન્દસ્વલક્ષણઃ ।
પરપ્રેમાસ્પદત્વેન પ્રતીતત્વાત્સુરર્ષભાઃ ।
પરપ્રેમાસ્પદાનન્દઃ સુરા આનન્દ એવ હિ ॥ ૧॥

પ્રિયો ભવતિ ભાર્યાયાઃ પતિઃ સોઽયં સુરર્ષભાઃ ॥ ૨॥

પતિર્ન પત્યુઃ કામાય પ્રિયો ભવતિ સર્વથા ।
કિં ત્વાત્મનસ્તુ કામાય તતઃ પ્રિયતમઃ સ્વયમ્ ॥ ૩॥

જાયાયાસ્તુ ન કામાય ન હિ જાયા પ્રિયા મતા ।
કિં ત્વાત્મનસ્તુ કામાય તતઃ પ્રિયતમઃ સ્વયમ્ ॥ ૪॥

પુત્રાણાં તુ ન કામાય પ્રિયાઃ પુત્રા ભવન્તિ ચ ।

કિં ત્વાત્મનસ્તુ કામાય તતઃ પ્રિયતમઃ સ્વયમ્ ॥ ૫॥

બ્રહ્મણસ્ત્વેવ કામાય ન બ્રહ્મ ભવતિ પ્રિયમ્ ।
કિં ત્વાત્મનસ્તુ કામાય તતઃ પ્રિયતમઃ સ્વયમ્ ॥ ૬॥

ક્ષત્રસ્યૈવ તુ કામાય ન ક્ષત્રં ભવતિ પ્રિયમ્ ।
કિં ત્વાત્મનસ્તુ કામાય તતઃ પ્રિયતમઃ સ્વયમ્ ॥ ૭॥

વિત્તસ્યૈવ તુ કામાય ન વિત્તં ભવતિ પ્રિયમ્ ।
કિં ત્વાત્મનસ્તુ કામાય તતઃ પ્રિયતમઃ સ્વયમ્ ॥ ૮॥

લોકાનામેવ કામાય ન ભવન્તિ પ્રિયાશ્ચ તે ।
કિં ત્વાત્મનસ્તુ કામાય તતઃ પ્રિયતમઃ સ્વયમ્ ॥ ૯॥

દેવાનામપિ કામાય પ્રિયા દેવા ભવન્તિ ન ।
કિં ત્વાત્મનસ્તુ કામાય તતઃ પ્રિયતમઃ સ્વયમ્ ॥ ૧૦॥

વેદાનામેવ કામાય પ્રિયા વેદા ભવન્તિ ન ।
કિં ત્વાત્મનસ્તુ કામાય તતઃ પ્રિયતમઃ સ્વયમ્ ॥ ૧૧॥

ભૂતાન્યપિ ચ ભૂતાનાં કામાય ન ભવન્તિ ચ ।
કિં ત્વાત્મનસ્તુ કામાય તતઃ પ્રિયતમઃ સ્વયમ્ ॥ ૧૨॥

સર્વસ્યૈવ તુ કામાય ન સર્વં ભવતિ પ્રિયમ્ ।
કિં ત્વાત્મનસ્તુ કામાય તતઃ પ્રિયતમઃ સ્વયમ્ ॥ ૧૩॥

અતઃ પ્રિયતમો હ્યાત્મા સુખવત્સુખલક્ષણઃ ।
સુખાભિલાષિભિઃ સોઽયં ત્યક્ત્વા કર્માણિ સાદરમ્ ॥ ૧૪॥

દ્રષ્ટવ્યસ્તુ સુરા નિત્યં શ્રોતવ્યશ્ચ તથૈવ ચ ।
મન્તવ્યશ્ચ વિચિન્ત્યશ્ચ સર્વં તદ્દર્શનાદિભિઃ ॥ ૧૫॥

દુઃખરાશેર્વિનાશાય પરમાદ્વૈતવિદ્ભવેત્ ॥ ૧૬॥

પરમાદ્વૈતવિજ્ઞાનાત્સંસારઃ પ્રવિણશ્યતિ ।
સ્વતઃસિદ્ધાદ્વયાનન્દઃ સ્વયમેવ વિભાતિ ચ ॥ ૧૭॥

પરાદાત્તં સુરા બ્રહ્મ સ્વતોઽન્યદ્બ્રહ્મ વેદ યઃ ।
તથા પરાદાત્ક્ષત્રં તં લોકા અપિ તથૈવ ચ ॥ ૧૮॥

દેવા વેદાશ્ચ ભૂતાનિ પરાદુઃ ખલુ તં પશુમ્ ।

સ્વસ્વરૂપાત્પરં કિઞ્ચિદપિ પશ્યન્પ્રણશ્યતિ ॥ ૧૯॥

બ્રહ્મક્ષત્રાદિભેદેન પ્રતીતા હ્યખિલા અમી ।
વર્ણાસ્તથાઽઽશ્રમાઃ સર્વે સઙ્કરાઃ સકલા અપિ ॥ ૨૦॥

દેવગન્ધર્વપૂર્વાશ્ચ ભૂતાનિ ભુવનાનિ ચ ।
અસ્તિ નાસ્તીતિ શબ્દાર્થૌ તથૈવાન્યચ્ચ કિઞ્ચન ॥ ૨૧॥

માયાવિદ્યાતમોમોહપ્રભેદા અખિલા અપિ ।
સર્વમાત્મૈવ નૈવાન્યદન્યબુદ્ધિર્હિ સંસૃતિઃ ॥ ૨૨॥

નિર્વિકલ્પે પરે તત્ત્વે વિદ્યયા બુદ્ધિવિશ્રમઃ ।
સા હિ સંસારવિચ્છિત્તિર્નાપરા પુરુષાધિકા ॥ ૨૩॥

પ્રતીતમવિશેષેણ સકલં બ્રહ્મ યઃ પુમાન્ ।
વેદ તં શિરસા નિત્યં પ્રણયામિ જગદ્ગુરુમ્ ॥ ૨૪॥

વેદા બહુમુખા ભાન્તિ સ્મૃતયશ્ચ તથૈવ ચ ।
પુરાણાનિ સમસ્તાનિ બુદ્ધાર્હાદ્યાગમાન્તરાઃ ॥ ૨૫॥

શૈવાશ્ચ વૈષ્ણવાશ્ચૈવ મદુક્તા આગમા અપિ ।
અપભ્રંશાઃ સમસ્તાશ્ચ કેવલં લૌકિકી મતિઃ ॥ ૨૬॥

તર્કાશ્ચ વિવિધાઃ સૂક્ષ્માઃ સ્થૂલાશ્ચ સકલા અપિ ।
પરસ્પરવિરોધેન પ્રભાન્તિ સકલાત્મનામ્ ॥ ૨૭॥

તેષામેવાવિરોધે તુ કાલો યાતિ ચ ધીમતામ્ ।
કથઞ્ચિત્કાલસદ્ભાવેઽપ્યવિરોધો ન સિધ્યતિ ॥ ૨૮॥

અતઃ સર્વં પરિત્યજ્ય મનસો મલકારણમ્ ।
યથાભાતેન રૂપેણ શિવં પશ્યેત્સુનિશ્ચલઃ ॥ ૨૯॥

ક્રિમિકીટપતઙ્ગેભ્યઃ પશવઃ પ્રજ્ઞયાઽધિકાઃ ।
પશ્વાદિભ્યો નરાઃ પ્રાજ્ઞાસ્તેષુ કેચન કોવિદાઃ ॥ ૩૦॥

તથા તેભ્યશ્ચ ગન્ધર્વાઃ પિતરો મતિમત્તમાઃ ।
અન્યે ચ તારતમ્યેન પણ્ડિતા ઉતરોત્તરમ્ ॥ ૩૧॥

યૂયં સત્ત્વોત્કટાઃ પ્રાજ્ઞાઃ સર્વેષામપિ હે સુરાઃ ।
યુષ્મભ્યોઽહં મહાપ્રાજ્ઞો મત્તઃ પ્રાજ્ઞો જનાર્દનઃ ॥ ૩૨॥

જનાર્દનાદપિ પ્રાજ્ઞઃ શઙ્કરો ગુણમૂર્તિષુ ।
તતઃ પ્રાજ્ઞતમઃ સાક્ષાચ્છિવઃ સામ્બઃ સનાતનઃ ॥ ૩૩॥

સ એવ સાક્ષાત્સર્વજ્ઞસ્તતોઽન્યો નાસ્તિ કશ્ચન ।
તસ્માદ્વિધામિમાં ત્યક્ત્વા બ્રહ્મ સર્વં વિલોકયેત્ ॥ ૩૪॥

આયાસસ્તાવદત્યલ્પઃ ફલં મુક્તિરિહૈવ તુ ।
તથાઽપિ પરમાદ્વૈતં નૈવ વાઞ્છન્તિ માનવાઃ ॥ ૩૫॥

કદાચિદપિ ચિત્તસ્ય ભયં કિઞ્ચિન્ન વિદ્યતે ।
તથાઽપિ પરમાદ્વૈતં નૈવ વાઞ્છન્તિ માનવાઃ ॥ ૩૬॥

સ્વસ્વરૂપાતિરેકેણ નાસ્તિ માનં વિરોધિ ચ ।
તથાઽપિ પરમાદ્વૈતં નૈવ વાઞ્છન્તિ માનવાઃ ॥ ૩૭॥

સ્વસ્વરૂપાતિરેકેણ તર્કશ્ચ ન હિ વિદ્યતે ।
તથાઽપિ પરમાદ્વૈતં નૈવ વાઞ્છન્તિ માનવાઃ ॥ ૩૮॥

શ્રુતિસ્મૃતિપુરાણાનિ પ્રાહુરેકત્વમાત્મનઃ ।
તથાઽપિ પરમાદ્વૈતં નૈવ વાઞ્છન્તિ માનવાઃ ॥ ૩૯॥

અનુગ્રાહકતર્કશ્ચ કુરુતે તર્કવેદનમ્ ।
તથાઽપિ પરમાદ્વૈતં નૈવ વાઞ્છન્તિ માનવાઃ ॥ ૪૦॥

શિવાગમેષુ ચાદ્વૈતં બભાષે પરમેશ્વરઃ ।
તથાઽપિ પરમાદ્વૈતં નૈવ વાઞ્છન્તિ માનવાઃ ॥ ૪૧॥

નારાયણોઽપિ ચાદ્વૈતં બભાષે સ્વાગમેષુ ચ ।
તથાઽપિ પરમાદ્વૈતં નૈવ વાઞ્છન્તિ માનવાઃ ॥ ૪૨॥

અહં ચાવોચમદ્વૈતં મદુક્તેષ્વાગમેષુ ચ ।
તથાઽપિ પરમાદ્વૈતં નૈવ વાઞ્છન્તિ માનવાઃ ॥ ૪૩॥

અન્યે ચ યોગિનઃ સર્વે પ્રાહુરદ્વૈતમાત્મનઃ ।
તથાઽપિ પરમાદ્વૈતં નૈવ વાઞ્છન્તિ માનવાઃ ॥ ૪૪॥

વિશુદ્ધજ્ઞાનિનાં દેવા નિષ્ઠાઽપ્યદ્વૈતગોચરા ।
તથાઽપિ પરમાદ્વૈતં નૈવ વાઞ્છન્તિ માનવાઃ ॥ ૪૫॥

કેચિત્સામાન્યમદ્વૈતં વદન્તિ ભ્રાન્તચેતસઃ ।
વિશેષં દ્વૈતમાશ્રિત્ય ન તેષામસ્તિ વેદનમ્ ॥ ૪૬॥

દ્વૈતમેવ હિ સર્વત્ર પ્રવદન્તિ હિ કેચન ।
ન તે મનુષ્યાઃ કીટાશ્ચ પતઙ્ગાશ્ચ ઘટા હિ તે ॥ ૪૭॥

અવિશેષેણ સર્વં તુ યઃ પશ્યતિ મહેશ્વરમ્ ।
સ એવ સાક્ષાદ્વિજ્ઞાની સ શિવઃ સ તુ દુર્લભઃ ॥ ૪૮॥

જગદિતિ પ્રતિભા વ્યવહારતઃ
    પરતરઃ પરમઃ પરમાર્થતઃ ।
ઇતિ મતિર્ન ભવત્યપિ કસ્યચિ-
    ચ્છશિધરસ્મરણેન હિ સિધ્યતિ ॥ ૪૯॥

જગદિતિ પ્રતિભાઽપિ ચ શાઙ્કરી
    મતિમતામિતિ મે સુવિનિશ્ચયઃ ।
ઇતિ મતિર્વિમલા ચ શુભાવહા
    શશિધરસ્મરણેન હિ સિધ્યતિ ॥ ૫૦॥

જગદિતિ પ્રતિભાસમપેક્ષ્ય ચ
    શ્રુતિરપિ પ્રિયહેતુમિહાહ હિ ।
ન હિ જગત્પ્રતિભા ન ચ સા શ્રુતિઃ
    પ્રિયકરઃ સકલશ્ચ ન વસ્તુતઃ ॥ ૫૧॥

ઇતિ મતિર્વિમલા નનુ જાયતે
    યદિ જનઃ શિવ એવ સ તાદૃશઃ ।
ન હિ કૃતિઃ સકલા મહાત્મનો
    યદિ કૃતિઃ પશુરેવ સ માનવઃ ॥ ૫૨॥

ન હિ જનિર્મરણં ગમનાગમૌ
    ન હિ મલં વિમલં ન ચ વેદનમ્ ।
શિવમિદં સકલં વિભાસતે
    સ્ફુટતરં પરમસ્ય તુ યોગિનઃ ॥ ૫૩॥

વિસૃજ્ય સન્દેહમશેષમાસ્તિકાઃ
    પ્રતીતમેતન્નિખિલં જડાજડમ્ ।
ગુરૂપદેશેન શિવં વિલોકયે-
    દ્વિલોકનં ચાપિ શિવં વિલોકયેત્ ॥ ૫૪॥

વિલોકનં ચાપિ શિવં વિલોકય-
    ન્વિલોકનં ચાપિ વિસૃજ્ય કેવલમ્ ।
સ્વભાવભૂતઃ સ્વચિતાઽવશિષ્યતે
    ચિતાઽવશેષશ્ચ ન તસ્ય તત્ત્વતઃ ॥ ૫૫॥

નિષ્ઠા તસ્ય મહાત્મનઃ સુરવરા વક્તું મયા શક્યતે
    ન પ્રૌઢેન શિવેન વા મુનિગણૈર્નારાયણેનાપિ ચ ।
વેદેનાપિ પુરાતનેન પરયા શક્ત્યા પરેણાથ વા
    મૂકીભાવમુપૈતિ તત્ર વિદુષાં નિષ્ઠા હિ તાદૃગ્વિધા ॥ ૫૬॥

સર્વમુક્તમિતિ વઃ સુરર્ષભાઃ
    કેવલેન કરુણાબલેન ચ ।
વેદ એવ સકલાર્થબોધકઃ
    શેષ એવ વચનં ચ તસ્ય મે ॥ ૫૭॥

ઇતિ બ્રહ્મગીતાસૂપનિષત્સુ બૃહદારણ્યકોપનિષદ્વ્યાખ્યાને
નવમોઽધ્યાયઃ ॥ ૯॥

---

॥ અથ દશમોઽધ્યાયઃ ॥

॥ બૃહાદારણ્યકવ્યાખ્યાકથનમ્ ॥

બ્રહ્મોવાચ ।
અસ્તિ સર્વાન્તરઃ સાક્ષી પ્રત્યગાત્મા સ્વયમ્પ્રભઃ ।
તદેવ બ્રહ્મ સમ્પૂર્ણમપરોક્ષતમં સુરાઃ ॥ ૧॥

પ્રાણાપાનાદિભેદસ્ય યઃ સત્તાસ્ફુરણપ્રદઃ ।
યસ્ય સન્નિધિમાત્રેણ ચેષ્ટતે સકલં સુરાઃ ॥ ૨॥

યશ્ચ સર્વસ્ય ચેષ્ટાયામસક્તો નિષ્ક્રિયઃ સ્વયમ્ ।
સ હિ સર્વાન્તરઃ સાક્ષાદાત્મા નાન્યઃ સુરર્ષભાઃ ॥ ૩॥

યોઽયં સર્વાન્તરઃ સ્વાત્મા સોઽહમર્થો ન વિગ્રહઃ ।
દૃશ્યત્વાદસ્ય દેહસ્ય દ્રષ્ટા યોઽસ્ય સ એવ સઃ ॥ ૪॥

યોઽયં સર્વાન્તરઃ સ્વાત્મા સોઽયં ન પ્રાણપૂર્વકઃ ।
દૃશ્યત્વાત્પ્રાણપૂર્વસ્ય દ્રષ્ટા યોઽસ્ય સ એવ સઃ ॥ ૫॥

દૃષ્ટેર્દ્રષ્ટા શ્રુતેઃ શ્રોતા મતેર્મન્તા ચ યઃ સુરાઃ ।
વિજ્ઞાતેરપિ વિજ્ઞાતા સ હિ સર્વાન્તરઃ પરઃ ॥ ૬॥

અતોઽન્યદાર્તં સકલં ન સત્યં તુ નિરૂપણે ।
સ એવ સર્વં નૈવાન્યદિતિ સમ્યઙ્નિરૂપણે ॥ ૭॥

યથા પૃથિવ્યામોતં ચ પ્રોતં ચ સકલં સુરાઃ ।
તથાઽપ્સુ સકલં દેવા ઓતં પ્રોતં ન સંશયઃ ॥ ૮॥

આપશ્ચ વાયૌ હે દેવા ઓતાઃ પ્રોતાસ્તથૈવ ચ ।
અન્તરિક્ષેષુ વાયુશ્ચ લોકેષુ સુરપુઙ્ગવાઃ ॥ ૯॥

અન્તરિક્ષાશ્ચ લોકાશ્ચ તથા ગન્ધર્વકેષુ ચ ।
લોકેષ્વાદિત્યલોકેષુ સ્થિતા ગન્ધર્વસઞ્જ્ઞિતાઃ ॥ ૧૦॥

ચન્દ્રલોકેષુ ચાદિત્યલોકા ઓતાસ્તથૈવ ચ ।
ચન્દ્રલોકાશ્ચ નક્ષત્રલોકેષુ સુરપુઙ્ગવાઃ ॥ ૧૧॥

દેવલોકેષુ નક્ષત્રલોકા ઓતાસ્તથૈવ ચ ।
દેવલોકાશ્ચ હે દેવા ઇન્દ્રલોકેષુ સંસ્થિતાઃ ॥ ૧૨॥

પ્રાજાપત્યેષુ લોકેષુ સ્થિતા ઐન્દ્રાઃ સુરર્ષભાઃ ।
પ્રાજાપત્યાસ્તથા લોકા બ્રહ્મલોકેષુ સંસ્થિતાઃ ॥ ૧૩॥

વિષ્ણુલોકેષુ હે દેવા બ્રહ્મલોકાઃ સુસંસ્થિતાઃ ।
વિષ્ણુલોકાસ્તથા ઓતા રુદ્રલોકેષુ હે સુરાઃ ॥ ૧૪॥

રુદ્રલોકાઃ સ્થિતા લોકેષ્વીશ્વરસ્ય સુરર્ષભાઃ ।
સદાશિવસ્ય લોકેષુ સ્થિતા હ્યૈશાઃ સુરર્ષભાઃ ॥ ૧૫॥

ઓતાઃ પ્રોતાશ્ચ તે લોકા બ્રહ્મસઞ્જ્ઞે પરે શિવે ।
એવં સર્વે સદા સાક્ષિસ્વરૂપે પ્રત્યગાત્મનિ ॥ ૧૬॥

સર્વાન્તરતમે પ્રોતા ઓતા અધ્યાસતઃ સ્થિતાઃ ॥ ૧૭॥

સર્વાધિષ્ઠાનરૂપસ્તુ પ્રત્યગાત્મા સ્વયમ્પ્રભઃ ।
ન કસ્મિંશ્ચિત્સ્થિતઃ સાક્ષી સત્સ્વરૂપઃ સુરર્ષભાઃ ॥ ૧૮॥

યસ્મિન્નધ્યસ્તરૂપેણ સ્થિતં સર્વં નિરૂપણે ।
સ એવ સકલં નાન્યદિતિ સમ્યઙ્નિરૂપણે ॥ ૧૯॥

યોઽયમાત્મા સ્વયં ભાતિ સત્તયાઽન્યવિવર્જિતઃ ।
સ એવ સાક્ષાત્સર્વેષામન્તર્યામી ન ચાપરઃ ॥ ૨૦॥

પૃથિવ્યામપિ યસ્તિષ્ઠન્પૃથિવ્યા અન્તરઃ સદા ।
યં ન વેદ સુરાઃ પૃથ્વી શરીરં યસ્ય ભૂરપિ ॥ ૨૧॥

યોઽન્તરો યમયત્યેતાં ભૂમિં નિષ્ક્રિયરૂપતઃ ।
એષ એવ હિ નઃ સાક્ષાદન્તર્યામી પરામૃતઃ ॥ ૨૨॥

અપ્સુ તિષ્ઠન્નપાં દેવા અન્તરો યં ન તા વિદુઃ ।
આપઃ શરીરં યસ્યૈતા યોઽન્તરો યમયત્યપઃ ।
એષ એવ હિ નઃ સાક્ષાદન્તર્યામી પરામૃતઃ ॥ ૨૩॥

એવમગ્નેશ્ચ યો નેતા ચાન્તરિક્ષસ્ય હે સુરાઃ ॥ ૨૪॥

વાયુપૂર્વસ્ય સર્વસ્ય ચેતનાચેતનસ્ય ચ ।
એષ એવ હિ નઃ સાક્ષાદન્તર્યામી પરામૃતઃ ॥ ૨૫॥

અદૃષ્ટોઽયં સુરા દ્રષ્ટા શ્રોતૈવાયં તથાઽશ્રુતઃ ।
અમતશ્ચ તથા મન્તા વિજ્ઞાતા કેવલં સુરાઃ ॥ ૨૬॥

રવિસોમાગ્નિપૂર્વેષુ વિનષ્ટેષ્વયમાસ્તિકાઃ ।
ચિત્તસાક્ષિતયા ભાતિ સ્વપ્રકાશેન કેવલમ્ ॥ ૨૭॥

ચિત્તવ્યાપારનાશે તુ તદભાવં સુરર્ષભાઃ ।
સ્વપ્રકાશેન જાનાતિ સુષુપ્તૌ વેદ તામપિ ॥ ૨૮॥

આવિર્ભાવતિરોભાવરહિતસ્તુ સ્વયમ્પ્રભઃ ।
ભાવાભાવાત્મકં સર્વં સદાઽયં વેદ કેવલઃ ॥ ૨૯॥

ભાવાભાવાત્મના વેદ્યં સમસ્તં સુરપુઙ્ગવાઃ ।
વેત્તૈવાયં ન ચૈવાન્યદિતિ સમ્યઙ્નિરૂપણમ્ ॥ ૩૦॥

એવં દ્વૈતં વિચારેણ સ્વાત્મના વેદ યઃ પુમાન્ ।
સ યોગી સર્વદા દ્વૈતં પશ્યન્નપિ ન પશ્યતિ ॥ ૩૧॥

દ્રષ્ટુર્દૃષ્ટેર્ન નાશોઽસ્તિ દૃશ્યમેવ વિનશ્યતિ ।
તચ્ચ દ્વૈતં દૃશેર્દૃશ્યં નાસ્તિ દ્રષ્ટાઽસ્તિ કેવલમ્ ॥ ૩૨॥

એષાઽસ્ય પરમા સમ્પદ્ગતિશ્ચ પરમાઽસ્ય તુ ।
એષોઽસ્ય પરમો લોક એતદ્ધિ પરમં સુખમ્ ॥ ૩૩॥

અહિનિર્લ્વયનીં મુક્તાં યથાઽહિઃ સ્વાત્મના પુનઃ ।
ન પશ્યતિ તથા વિદ્વાન્ન દેહેઽહમ્મતિર્ભવેત્ ॥ ૩૪॥

સર્વાધારે સ્વતઃસિદ્ધે શિવસઞ્જ્ઞે તુ નિર્મલે ।
પ્રત્યગ્રૂપે પરાનન્દે નેહ નાનાઽસ્તિ કિઞ્ચન ॥ ૩૫॥

મૃત્યોઃ સ મૃત્યુમાપ્નોતિ ઇહ નાનેવ પશ્યતિ ।
તસ્માદધ્યસ્તમજ્ઞાનં તત્કાર્યં ચાત્મરૂપતઃ ॥ ૩૬॥

એકધૈવ મહાયાસાદ્દ્રષ્ટવ્યો હિ મુમુક્ષુભિઃ ।
અયમાત્માઽપ્રમેયશ્ચ વિરજશ્ચ મહાન્ધ્રુવઃ ॥ ૩૭॥

તમેવ ધીરો વિજ્ઞાય પ્રજ્ઞાં કુર્વીત બ્રાહ્મણઃ ।
નાનુધ્યાયાદ્બહૂઞ્છબ્દાન્વાચો વિગ્લાપનં હિ તત્ ॥ ૩૮॥

સ વા એષ મહાનાત્મા જન્મનાશાદિવર્જિતઃ ।
વશી સર્વસ્ય લોકસ્ય સર્વસ્યેશાન એવ ચ ॥ ૩૯॥

સર્વસ્યાધિપતિઃ શુદ્ધો ન ભૂયાન્સાધુકર્મણા ।
કર્મણાઽસાધુના નૈવ કનીયાન્સુરપુઙ્ગવાઃ ॥ ૪૦॥

એષ સર્વેશ્વરઃ સાક્ષાદ્ભૂતાધિપતિરેવ ચ ।
ભૂતપાલશ્ચ લોકાનામસમ્ભેદાય હે સુરાઃ ॥ ૪૧॥

એષ સેતુર્વિધરણસ્તમેવ બ્રાહ્મણોત્તમાઃ ।
વેદાનુવચનેનાપિ યજ્ઞેન સકલેન ચ ॥ ૪૨॥

દાનેન તપસા દેવાસ્તથૈવાનશનેન ચ ।
વેત્તુમિચ્છતિ યો વિદ્વાન્સ મુનિર્નેતરો જનઃ ॥ ૪૩॥

નેતિ નેતીતિ નિષ્કૃષ્ટો ય એષ સર્વસાધકઃ ।
સોઽયમાત્મા સદાઽગ્રાહ્યસ્વરૂપો ન હિ ગૃહ્યતે ॥ ૪૪॥

તથાઽશીર્યસ્વભાવશ્ચ હે દેવા નૈવ શીર્યતે ।
અસઙ્ગરૂપો ભગવાન્સર્વદા ન હિ સજ્જતે ॥ ૪૫॥

એષ નિત્યો મહિમા બ્રાહ્મણસ્ય
    ન વર્ધતે કર્મણા નો કનીયાન્ ।
તસ્યૈવ સ્યાત્પદવિત્તં વિદિત્વા

    ન લિપ્યતે કર્મણા પાપકેન ॥ ૪૬॥

તસ્માદ્બ્રહ્મજ્ઞાનલાભાય વિદ્વા-
    ઞ્શાન્તો દાન્તઃ સત્યવાદી ભવેચ્ચ ।
કર્મત્યાગી સર્વવેદાન્તસિદ્ધં
    વિદ્યાહેતું સન્તતં ત્વભ્યુપેયાત્ ॥ ૪૭॥

ત્રિપુણ્ડ્રમુદ્ધૂલનમાસ્તિકોત્તમાઃ
    સદાઽઽચરેચ્છઙ્કરવેદને રતઃ ।
શિવાદિશબ્દં ચ જપેદ્વિશેષતઃ
    પ્રપૂજયેદ્ભક્તિપુરઃસરં હરમ્ ॥ ૪૮॥

સાધનૈઃ સકલૈઃ સહિતઃ સુરા
    વેદનેન સમસ્તમિદં જગત્ ।
દેવરૂપતયૈવ તુ નિશ્ચિતં
    વેદહસ્તતલસ્થિતબિલ્વવત્ ॥ ૪૯॥

નૈનં પાપ્મા તરતિ બ્રહ્મનિષ્ઠં
    સર્વં પાપં તરતિ પ્રાકૃતં ચ ।
નૈનં પાપ્મા તપતિ બ્રહ્મનિષ્ઠં
    સર્વં પાપં તપતિ પ્રાકૃતં ચ ॥ ૫૦॥

ઇત્થં બ્રહ્મ સ્વાત્મભૂતં વિદિત્વા
    શ્રદ્ધાપૂર્વં દેહમેતં સ્વકીયમ્ ।
અર્થં સર્વં ક્ષેત્રજાતં સમસ્તં
    દદ્યાદસ્મૈ દેશિકેન્દ્રાય મર્ત્યઃ ॥ ૫૧॥

યશ્ચાતૃણત્ત્યવિતથેન કર્ણા-
    વદુઃખં કુર્વન્નમૃતં સમ્પ્રયચ્છન્ ।
તં વિદ્યાત્પિતરં માતરં ચ
    તસ્મૈ ન દ્રુહ્યેત્કૃતમસ્ય જાનન્ ॥ ૫૨॥

સ્વદેશિકસ્યૈવ તુ નામકીર્તનં
    ભવેદનન્તસ્ય શિવસ્ય ચિન્તનમ્ ।
સ્વદેશિકસ્યૈવ તુ પૂજનં તથા
    ભવેદનન્તસ્ય શિવસ્ય પૂજનમ્ ॥ ૫૩॥

સ્વદેશિકસ્યૈવ તુ નામકીર્તનં
    શિવાદિશબ્દસ્ય તુ કીર્તનં ભવેત્ ।
સ્વદેશિકસ્યૈવ તુ બાધનં તથા
    ભવેદનન્તસ્ય શિવસ્ય બાધનમ્ ॥ ૫૪॥

તસ્માદ્વિદ્વાન્સર્વમેતદ્વિહાય
    શ્રદ્ધાયુક્તઃ સદ્ગુરું સત્યનિષ્ઠમ્ ।
વિદ્યાકોશં વેદવેદાન્તનિષ્ઠં
    ગચ્છેન્નિત્યં સત્યધર્માદિયુક્તઃ ॥ ૫૫॥

વક્તવ્યં સકલં મયા પરકૃપાયુક્તેન સઙ્કીર્તિતં
    કર્તવ્યં સકલં સુરા ન હિ મુનેર્બ્રહ્માત્મનિષ્ઠસ્ય તુ ।
સ્મર્તવ્યં સકલં તથા ન હિ સદા બ્રહ્મૈવ સચ્ચિત્સુખં
    સમ્પૂર્ણં સતતોદિતં સમરસં શશ્વત્સ્વયં ભાસતે ॥ ૫૬॥

ઇતિ બ્રહ્મગીતાસૂપનિષત્સુ બૃહદારણ્યકવ્યાખ્યાકથનં નામ
દશમોઽધ્યાયઃ ॥ ૧૦॥

---

॥ અથ એકાદશોઽધ્યાયઃ ॥

॥ કઠવલ્લીશ્વેતાશ્વતરવ્યાખ્યાયામ્ ॥

બ્રહ્મોવાચ ।
અસ્તિ તત્ત્વં પરં સાક્ષાદ્દુર્દર્શં ગૂઢમુત્તમમ્ ।
અનુપ્રવિષ્ટં સર્વત્ર ગુહાયાં નિહિતં પરમ્ ॥ ૧॥

તદ્વિદિત્વા મહાધીરો હર્ષશોકૌ જહાતિ ચ ।
ધર્માદિભ્યઃ પરં તત્તુ ભૂતાદ્ભવ્યાચ્ચ સત્તમાઃ ॥ ૨॥

યદામનન્તિ વેદાશ્ચ તપાંસિ પરમં પદમ્ ।
બ્રહ્મચર્યં યદિચ્છન્તશ્ચરન્તિ શિવ એવ સઃ ॥ ૩॥

એતદ્ધ્યેવાક્ષરં બ્રહ્મ એતદ્ધ્યેવાક્ષરં પરમ્ ।
એતદ્ધ્યેવાક્ષરં જ્ઞાત્વા યો યદિચ્છતિ તસ્ય તત્ ॥ ૪॥

એતદાલમ્બનં શ્રેષ્ઠમેતદાલમ્બનં પરમ્ ।
એતદાલમ્બનં જ્ઞાત્વા બ્રહ્મલોકે મહીયતે ॥ ૫॥

ન જાયતે મ્રિયતે વા વિપશ્ચિ-
    ન્નાયં કુતશ્ચિન્ન બભૂવ કશ્ચિત્ ।
અજો નિત્યઃ શાશ્વતોઽયં પુરાણો
    ન હન્યતે હન્યમાને શરીરે ॥ ૬॥

ય એનં વેત્તિ હન્તારં યશ્ચૈનં મન્યતે હતમ્ ।
તાવુભૌ ન વિજાનીતો નાયં હન્તિ ન હન્યતે ॥ ૭॥

અણોરણીયાન્મહતો મહીયા-
    નાત્માઽસ્ય જન્તોર્નિહિતો ગુહાયામ્ ।
તમક્રતુઃ પશ્યતિ વીતશોકો
    ધાતુપ્રસાદાન્મહિમાનમસ્ય ॥ ૮॥

દૂરં વ્રજતિ ચાસીનઃ શયાનો યાતિ સર્વતઃ ।
કસ્તં સાક્ષાન્મહાદેવં મદન્યો જ્ઞાતુમર્હતિ ॥ ૯॥

અશરીરં શરીરેષુ હ્યનવસ્થેષ્વવસ્થિતમ્ ।
મહાન્તં વિભુમાત્માનં મત્વા ધીરો ન શોચતિ ॥ ૧૦॥

નાયમાત્મા પ્રવચનેન લભ્યો
    ન મેધયા ન બહુના શ્રુતેન ।
યમેવૈષ વૃણુતે તેન લભ્ય-
    સ્તસ્યૈષ આત્મા વિવૃણુતે તનૂં સ્વામ્ ॥ ૧૧॥

નાવિરતો દુશ્ચરિતાન્નાશાન્તો નાસમાહિતઃ ।
નાશાન્તમાનસો વાઽપિ પ્રજ્ઞાનેનૈનમાપ્નુયાત્ ॥ ૧૨॥

યસ્ય બ્રહ્મ ચ ક્ષત્રં ચ ઉભે ભવત ઓદનઃ ।
ક ઇત્થં વેદ દેવો વા મનુષ્યોઽન્યશ્ચ યત્ર સઃ ॥ ૧૩॥

ઋતૌ પિબન્તૌ સુકૃતસ્ય લોકે
    ગુહાં પ્રવિષ્ટૌ પરમે પરાર્ધે ।
છાયાતપૌ બ્રહ્મવિદો વદન્તિ
    શરીરભૃચ્છઙ્કરસઞ્જ્ઞિતૌ તૌ ॥ ૧૪॥

શરીરભૃત્કર્મફલં ભુઙ્ક્તે યોજયિતા શિવઃ ।
પ્રતીતિતો વિરુદ્ધૌ તૌ ભેદસ્ત્વૌપાધિકસ્તયોઃ ॥ ૧૫॥

આત્માનં રથિનં વિદ્ધચ્છરીરં રથમેવ તુ ।

બુદ્ધિં તુ સારથિં વિદ્યાન્મનઃ પ્રગ્રહમેવ ચ ॥ ૧૬॥

ઇન્દ્રિયાણિ હયાન્વિદ્યાદ્વિષયાનપિ ગોચરાન્ ।
આત્મેન્દ્રિયમનોયુક્તં વિદ્યાદ્ભોક્તારમાસ્તિકાઃ ॥ ૧૭॥

યસ્ત્વવિજ્ઞાનવાન્મર્ત્યોઽયુક્તેન મનસા સદા ।
તસ્યેન્દ્રિયાણ્યવશ્યાનિ દુષ્ટાશ્વા ઇવ સારથેઃ ॥ ૧૮॥

યસ્તુ વિજ્ઞાનવાન્મર્ત્યો યુક્તેન મનસા સદા ।
તસ્યેન્દ્રિયાણિ વશ્યાનિ સદશ્વા ઇવ સારથેઃ ॥ ૧૯॥

યસ્ત્વવિજ્ઞાનવાન્મર્ત્યો હ્યમનસ્કઃ સદાઽશુચિઃ ।
ન સ તત્પદમાપ્નોતિ સંસારં ચાધિગચ્છતિ ॥ ૨૦॥

યસ્તુ વિજ્ઞાનવાન્મર્ત્યઃ સમનસ્કઃ સદા શુચિઃ ।
સ તુ તત્પદમાપ્નોતિ યસ્માદ્ભૂયો ન જાયતે ॥ ૨૧॥

વિજ્ઞાનસારથિર્યસ્તુ મનઃ પ્રગ્રહવાન્નરઃ ।
સોઽધ્વનઃ પારમાપ્નોતિ તદ્વિષ્ણોઃ પરમં પદમ્ ॥ ૨૨॥

પદં યત્પરમં વિષ્ણોસ્તદેવાખિલદેહિનામ્ ।
પદં પરમમદ્વૈતં સ શિવઃ સામ્બવિગ્રહઃ ॥ ૨૩॥

રુદ્રવિષ્ણુપ્રજેશાનામન્યેષામપિ દેહિનામ્ ।
ઋતે સામ્બં મહાદેવં કિં ભવેત્પરમં પદમ્ ॥ ૨૪॥

ઇન્દ્રિયેભ્યઃ પરા હ્યર્થા અર્થેભ્યશ્ચ પરં મનઃ ।
મનસસ્તુ પરા બુદ્ધિર્બુદ્ધેરાત્મા મહાન્પરઃ ॥ ૨૫॥

મહતઃ પરમવ્યક્તમવ્યક્તાત્પુરુષઃ પરઃ ।
પુરુષાન્ન પરં કિઞ્ચિત્સા કાષ્ઠા સા પરા ગતિઃ ॥ ૨૬॥

પુરુષો નામ સમ્પૂર્ણઃ શિવઃ સત્યાદિલક્ષણઃ ।
સામ્બમૂર્તિધરો નાન્યો રુદ્રો વિષ્ણુરજોઽપિ વા ॥ ૨૭॥

એષ સર્વેષુ ભૂતેષુ ગૂઢાત્મા ન પ્રકાશતે ।
દૃશ્યતે ત્વગ્ર્યયા બુદ્ધ્યા સૂક્ષ્મયા સૂક્ષ્મદર્શિભિઃ ॥ ૨૮॥

યચ્છેદ્વાઙ્મનસી પ્રાજ્ઞસ્તદ્યચ્છેજ્જ્ઞાન આત્મનિ ।
મહત્યાત્મની વિજ્ઞાનં તદ્યચ્છેચ્છાન્ત આત્મનિ ॥ ૨૯॥

અશબ્દમસ્પર્શમરૂપમવ્યયં
    તથાऽરસં નિત્યમગન્ધવચ્ચ યત્ ।
અનાદ્યનન્તં મહતઃ પરં ધ્રુવં
    નિચાય્ય તં મૃત્યુમુખાત્પ્રમુચ્યતે ॥ ૩૦॥

પરાઞ્ચિ ખાનિ વ્યતૃણન્મહેશ-
    સ્તસ્માત્પરાઙ્પશ્યતિ નાત્મરૂપમ્ ।
કશ્ચિદ્ધીરઃ પ્રત્યગાત્માનમૈક્ષ-
    દાવૃત્તચક્ષુરમૃતત્વમિચ્છન્ ॥ ૩૧॥

પરાચ્યઃ કામાનનુયન્તિ બાલા
    મૃત્યોઃ પાશં તેऽપિયન્તિ સ્વમોહાત્ ।
અથ ધીરા અમૃતત્વં વિદિત્વા
    ધ્રુવં તત્ત્વં યાન્તિ કામૈરસક્તાઃ ॥ ૩૨॥

યેન રૂપાન્ રસાન્ગન્ધાઞ્શબ્દાન્સ્પર્શાંશ્ચ મૈથુનાન્ ।
એતેનૈવ વિજાનાતિ કિમત્ર પરિશિષ્યતે ॥ ૩૩॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાખ્યં પુરં યેનાનુપશ્યતિ ।
મહાન્તં પરમાત્માનં મત્વા ધીરો ન શોચતિ ॥ ૩૪॥

જાગ્રદાદિત્રયં યસ્તુ વિજાનાતિ ચિદાત્મના ।
તતો ભેદેન નૈવાસ્તિ પુરત્રયમિદં સદા ॥ ૩૫॥

ચૈતન્યમાત્રો ભગવાઞ્શિવ એવ સ્વયમ્પ્રભઃ ।
પુરત્રયાત્મના ભાતિ ન ભાતિ ચ મહાપ્રભુઃ ॥ ૩૬॥

ઇહામુત્ર સ્થિતં તત્ત્વં સદેકં ન તતોऽપરમ્ ।
મૃત્યોઃ સ મૃત્યુમાપ્નોતિ યોऽન્યં દેવં પ્રપશ્યતિ ॥ ૩૭॥

અગ્નિર્યથૈકો ભુવનં પ્રવિષ્ટો
    રૂપં રૂપં પ્રતિરૂપો બભૂવ ।
એકસ્તથા સર્વભૂતાન્તરાત્મા
    રૂપં રૂપં પ્રતિરૂપો બહિશ્ચ ॥ ૩૮॥

વાયુર્યથૈકો ભુવનં પ્રવિષ્ટો
    રૂપં રૂપં પ્રતિરૂપો બભૂવ ।
એકસ્તથા સર્વભૂતાન્તરાત્મા

રૂપં રૂપં પ્રતિરૂપો બહિશ્ચ ॥ ૩૯॥

સૂર્યો યથા સર્વલોકસ્ય ચક્ષુ-
ર્ન લિપ્યતે ચાક્ષુષૈર્બાહ્યદોષૈઃ ।
એકસ્તથા સર્વભૂતાન્તરાત્મા
ન લિપ્યતે લોકદુઃખેન બાહ્યઃ ॥ ૪૦॥

એકો વશી સર્વભૂતાન્તરાત્મા
એકં રૂપં બહુધા યઃ કરોતિ ।
તમાત્મસ્થં યેઽનુપશ્યન્તિ ધીરા-
સ્તેષાં સુખં શાશ્વતં નેતરેષામ્ ॥ ૪૧॥

યેનૈવ નિત્યાશ્ચ સચેતનશ્ચ
યસ્મિન્વિભક્તાઃ પ્રવિભાન્તિ મોહાત્ ।
તમાત્મસ્થં યેઽનુપશ્યન્તિ ધીરા-
સ્તેષાં શાન્તિઃ શાશ્વતી નેતરેષામ્ ॥ ૪૨॥

તદેતદિતિ મન્યન્તેઽનિર્દેશ્યં પરમં સુખમ્ ।
કથં નુ તદ્વિજાનીયત્કિમુ ભાતિ વિભાતિ વા ॥ ૪૩॥

આદિત્યચન્દ્રાનલતારકાદ્યા
ન ભાન્તિ યસ્મિન્નનિશં મહાન્તઃ ।
પ્રકાશમાનં તમનુપ્રભાન્તિ
પ્રભાનમસ્યૈવ હિ નેતરેષામ્ ॥ ૪૪॥

ઊર્ધ્વમૂલસ્ત્વવાક્શાખ એષોઽશ્વત્થઃ સનાતનઃ ।
તદેવ શુક્રં તદ્બ્રહ્મ તદેવામૃતમુચ્યતે ॥ ૪૫॥

તસ્મિઁલ્લોકાઃ શ્રિતાઃ સર્વે તદુ નાત્યેતિ કશ્ચન ।
એતદ્વૈ તત્સુરશ્રેષ્ઠાઃ સમ્યગેવ મયોદિતમ્ ॥ ૪૬॥

ઇદં સર્વં જગત્સાક્ષાચ્છિવઃ કમ્પયતે ધ્રુવમ્ ।
મહદ્ભયમિદં વજ્રં વિદિત્વા મુચ્યતે નરઃ ॥ ૪૭॥

તપત્યસ્ય ભયાદગ્નિર્ભયાત્તપતિ ભાસ્કરઃ ।
ભયાદિન્દ્રશ્ચ વાયુશ્ચ મૃત્યુર્ધાવતિ પઞ્ચમઃ ॥ ૪૮॥

વર્તમાને શરીરેઽસ્મિન્ન શક્તો બોદ્ધુમીશ્વરમ્ ।
નરઃ સર્વેષુ લોકેષુ શરીરિત્વાય કલ્પતે ॥ ૪૯॥

યથાઽઽદર્શે સ્વકં રૂપં યથાવન્નિર્મલે નરઃ ।
તથા પશ્યતિ દેહેસ્મિન્નાત્માનં બ્રહ્મ કેવલમ્ ॥ ૫૦॥

જન્મનાશવતાં ખાનાં પૃથગ્ભાવં પરાત્મનઃ ।
તેષાં જન્મવિનાશૌ ચ વિદિત્વાઽનાત્મરૂપતઃ ॥ ૫૧॥

પશ્ચાદનાત્મરૂપેણ વિદિતં કેવલાત્મના ।
વિદિત્વા સ્વાનુભૂત્યેવ સ ધીરસ્તુ ન શોચતિ ॥ ૫૨॥

ઇન્દ્રિયેભ્યો મનઃ શ્રેષ્ઠં મનસઃ સત્ત્વમુત્તમમ્ ।
સત્ત્વાદપિ મહાનાત્મા મહતોઽવ્યક્તમુત્તમમ્ ॥ ૫૩॥

અવ્યક્તાત્તુ પરઃ સાક્ષાદ્વ્યાપકોઽલિઙ્ગ એવ ચ ।
યં વિદિત્વા નરઃ સાક્ષાદમૃતત્વં હિ ગચ્છતિ ॥ ૫૪॥

ન સન્દૃશે તિષ્ઠતિ રૂપમસ્ય
    ન ચક્ષુષા પશ્યતિ કશ્ચિદેનમ્ ।
હૃદા મનીષા મનસાઽભિક્લૃપ્તઃ
    સાક્ષાદાત્મા શક્યતે વેદિતું સઃ ॥ ૫૫॥

એવં સાક્ષાત્સચ્ચિદાનન્દરૂપં
    ભાવાભાવાશેષલોકસ્ય હેતુમ્ ।
શ્રુત્યા યુક્ત્યા બ્રહ્મ જાનન્તિ મર્ત્યા
    વિદ્યાયોગાદેવ મુક્તા ભવન્તિ ॥ ૫૬॥

વિદ્યાવેદ્યં બ્રહ્મ યદ્વેદસિદ્ધં
    તસ્યાચિન્ત્યા કાચિદસ્ત્યેવ શક્તિઃ ।
શક્ત્યા ભિન્નં તદ્ભવત્યદ્વયં
    સત્સત્યાનન્દાસઙ્ગબોધૈકરૂપમ્ ॥ ૫૭॥

એકં રૂપં બ્રહ્મણો જીવરૂપં
    ભોગ્યં વિશ્વં બ્રહ્મણસ્ત્વન્યરૂપમ્ ।
અન્યદ્રૂપં બ્રહ્મણઃ સર્વશાસ્ત્રં
    પ્રજ્ઞામાત્રં શુદ્ધરૂપં પરસ્ય ॥ ૫૮॥

સર્વાજીવે સર્વસંસ્થે બૃહન્તે
    તસ્મિઞ્જીવો ભ્રામ્યતે બ્રહ્મચક્રે ।

બ્રહ્માત્માનં પ્રેરિતારં ચ યુક્ત્યા
    મત્વા ચૈકં યાતિ મર્ત્યોઽમૃતત્વમ્ ॥ ૫૯ ॥

જ્ઞાજ્ઞૌ જીવાજીવસઙ્જ્ઞૌ પ્રતીત્યા
    શ્રુત્યા યુક્ત્યા સ્વાનુભૂત્યા હ્યભિન્નૌ ।
માયા ભોક્તુર્ભોગહેતુઃ પરાત્મા
    રૂપૈરેભિર્વિશ્વરૂપો હ્યકર્તા ॥ ૬૦ ॥

ક્ષરં માયા ચાક્ષરં જીવરૂપં
    ક્ષરાત્મના ભિદ્યતે દેવ એકઃ ।
તસ્ય ધ્યાનાદ્યોજનાતત્ત્વભાવા-
    દ્ભૂયશ્ચાન્તે વિશ્વમાયાનિવૃત્તિઃ ॥ ૬૧ ॥

જ્ઞાત્વા દેવં સર્વપાશાપહાનિઃ
    ક્ષીણૈઃ ક્લેશૈર્જન્મમૃત્યુપ્રહાણિઃ ।
તસ્ય ધ્યાનાન્મૂલમાયાવિભેદે
    વિશ્વૈશ્વર્યં યાતિ કૈવલ્યરૂપમ્ ॥ ૬૨ ॥

એતજ્જ્ઞેયં નિત્યમેવાત્મસંસ્થં
    નાતઃ પરં વેદિતવ્યં હિ કિઞ્ચિત્ ।
ભોક્તા ભોગ્યં પ્રેરિતારં ચ મત્વા
    સર્વં પ્રોક્તં ત્રિવિધં બ્રહ્મમેતત્ ॥ ૬૩ ॥

વહ્નેર્યથા યોનિગતસ્ય મૂર્તિ-
    ર્ન દૃશ્યતે નૈવ ચ લિઙ્ગનાશઃ ।
સ ભૂય એવેન્ધનયોનિગૃહ્ય-
    સ્તદ્વોભયં વૈ પ્રણવેન દેહે ॥ ૬૪ ॥

સ્વદેહમરણિં કૃત્વા પ્રણવં ચોત્તરારણિમ્ ।
ધ્યાનનિર્મથનાભ્યાસાદ્દેવં પશ્યેન્નિગૂઢવત્ ॥ ૬૫ ॥

તિલેષુ તૈલં દધિનીવ સર્પિ-
    રાપઃ સ્રોતઃસ્વરણીષુ ચાગ્નિઃ ।
એવમાત્માઽઽત્મનિ ગૃહ્યતેઽસૌ
    સત્યેનૈવં તપસા યોઽનુવેત્તિ ॥ ૬૬ ॥

સર્વવ્યાપિનમાત્માનં ક્ષીરે સર્પિરિવાર્પિતમ્ ।

આત્મવિદ્યાતપોમૂલં તદ્બ્રહ્મોપનિષત્પરમ્ ॥ ૬૭॥

યજ્ઞજ્ઞાનાદિભિઃ પુણ્યૈર્યોગસિદ્ધિર્ભવિષ્યતિ ।
યોગાત્સઞ્જાયતે જ્ઞાનં જ્ઞાનાન્મુક્તિર્ન કર્મણા ॥ ૬૮॥

અત્યાશ્રમિભ્યઃ શાન્તેભ્યો વક્તવ્યં બ્રહ્મવેદનમ્ ।
નાપ્રશાન્તાય દાતવ્યં નાપુત્રાય કદાચન ॥ ૬૯॥

અગ્નિરિત્યાદિભિર્મન્ત્રૈર્ભસ્મનોદ્ધૂલનં તથા ।
ત્રિપુણ્ડ્રધારણં ચાપિ વદન્ત્યત્યાશ્રમં બુધાઃ ॥ ૭૦॥

યસ્ય દેવે પરા ભક્તિર્યથા દેવે તથા ગુરૌ ।
તસ્યૈતે કથિતા હ્યર્થાઃ પ્રકાશન્તે મહાત્મનઃ ॥ ૭૧॥

શ્રુતિવચનેન મયૈવ સમસ્ત
    પરમકૃપાબલતઃ પઠિતં ચ ।
યદિ વિદિતં સ નરઃ સ્વકમોહં
    તરતિ શિવં વિશતિ પ્રિયરૂપમ્ ॥ ૭૨॥

ઇતિ બ્રહ્મગીતાસૂપનિષત્સુ
કઠવલ્લીશ્વેતાશ્વતરવ્યાખ્યાયામેકાદશોઽધ્યાયઃ ॥ ૧૧॥

---

॥ અથ દ્વાદશોઽધ્યાયઃ ।
॥ શિવસ્યાહમ્પ્રત્યયાશ્રત્વમ્ ॥

બ્રહ્મોવાચ।
વક્ષ્યે સારતરં સાક્ષાત્સર્વશાસ્ત્રાર્થસઙ્ગ્રહમ્ ।
શ્રદ્ધયા સહિતા યૂયં શ‍ૃણુતાતીવ શોભનમ્ ॥ ૧॥

અસ્તિ તાવદહંશબ્દપ્રત્યયાલમ્બનં સુરાઃ ।
સર્વેષાં નઃ પરં જ્ઞાનં સ એવાત્મા ન સંશયઃ ॥ ૨॥

સોઽયં સ્વાવિદ્યયા સાક્ષાચ્છિવઃ સન્નપિ વસ્તુતઃ ।
સ્વશિવત્વમવિજ્ઞાય સંસારીવાવભાસતે ॥ ૩॥

વેદોદિતેન માર્ગેણ પારમ્પર્યક્રમેણ તુ ।
મુમુક્ષુત્વં દૃઢં પ્રાપ્ય પુનઃ શાન્ત્યાદિસાધનૈઃ ॥ ૪॥

સહિતઃ શિવભક્ત્યા ચ ગુરોઃ પાદૌ પ્રણમ્ય ચ ।

વેદાન્તાનાં મહાવાક્યશ્રવણેન તથૈવ ચ ॥ ૫॥

મનનેન તથા દેવા ધ્યાનેન પરમાત્મનઃ ।
પ્રત્યગ્બ્રહ્મૈકતાજ્ઞાનં લબ્ધ્વા યાતિ શિવં પરમ્ ॥ ૬॥

પ્રત્યગાત્માનમદ્વન્દ્વમહંશબ્દોપલક્ષિતમ્ ।
શિવરૂપેણ સમ્પશ્યન્નેવ યાતિ સ્વપૂર્ણતામ્ ॥ ૭॥

શિવરૂપતયા ભાતેઽહંશબ્દાર્થે મુનીશ્વરાઃ ।
અવિદ્યા વિલયં યાતિ વિદ્યયા પરયૈવ તુ ॥ ૮॥

વિદ્યયા પરયાઽવિદ્યાનિવૃત્તૌ બ્રહ્મ કેવલમ્ ।
શિષ્યતે ખલુ નાભાવો ભાવો નાન્યસ્તથાઽપિ ચ ॥ ૯॥

વ્યવહારદૃશાઽવિદ્યા તન્નિવૃત્તિશ્ચ કથ્યતે ।
તત્ત્વદૃષ્ટ્યા તુ નાવિદ્યા તન્નિવૃત્તિશ્ચ હે સુરાઃ ॥ ૧૦॥

બ્રહ્મરૂપતયા બ્રહ્મ કેવલં પ્રતિભાસતે ।
જગદ્રૂપતયાઽપ્યેતદ્બ્રહ્મૈવ પ્રતિભાસતે ॥ ૧૧॥

વિદ્યાવિદ્યાદિભેદેન ભાવાભાવાદિભેદતઃ ।
ગુરુશિષ્યાદિભેદેન બ્રહ્મૈવ પ્રતિભાસતે ॥ ૧૨॥

બ્રહ્મ સર્વમિતિ જ્ઞાનં બ્રહ્મપ્રાપ્તેસ્તુ સાધનમ્ ।
જગન્માયેતિ વિજ્ઞાનમજ્ઞાનં ફલતો ભવેત્ ॥ ૧૩॥

તથાઽપિ પરમાદ્વૈતજ્ઞાનસ્યેદં તુ વેદનમ્ ।
ઉપકારકમત્યન્તં તદ્દૃષ્ટ્વા વક્તિ ચ શ્રુતિઃ ॥ ૧૪॥

યથા ભાતસ્વરૂપેણ સત્યત્વેન જગચ્છ્રુતિઃ ।
અઙ્ગીકૃત્ય હિતં નૃણાં કદાચિદ્વક્તિ સાદરમ્ ॥ ૧૫॥

સત્યત્વેન જગદ્ભાનં સંસારસ્ય પ્રવર્તકમ્ ।
અસત્યત્વેન ભાનં તુ સંસારસ્ય નિવર્તકમ્ ॥ ૧૬॥

અતઃ સંસારનાશાય કદાચિત્પરમા શ્રુતિઃ ।
જગત્સર્વમિદં માયા વદત્યત્યન્તનિર્મલા ॥ ૧૭॥

અતીવ પક્વચિત્તસ્ય ચિત્તપાકમપેક્ષ્ય સા ।
સર્વં બ્રહ્મેતિ કલ્યાણી શ્રુતિર્વદતિ સાદરમ્ ॥ ૧૮॥

બ્રહ્મૈવ કેવલં શુદ્ધં વિદ્યતે તત્ત્વદર્શને ।
ન ચ વિદ્યા ન ચાવિદ્યા જગચ્ચ ન ચાપરમ્ ॥ ૧૯॥

અતઃ પરમનિર્વાણનિષ્ઠસ્ય પરયોગિનઃ ।
યથા યથાઽવભાસોઽયં શિવ એવ ન ચાપરમ્ ॥ ૨૦॥

ભૂતપૂર્વાનુસન્ધાનાત્કથ્યતે ન ચ વસ્તુતઃ ।
યથા યથાઽવભાસોઽયં શિવ ઇત્યપિ વેદનમ્ ॥ ૨૧॥

ન હિ નિર્વાણનિષ્ઠસ્ય શિવસ્ય પરયોગિનઃ ।
યથા યથેતિ યત્કિઞ્ચિદ્ભાસતે પરમાર્થતઃ ॥ ૨૨॥

તથા તથાઽવભાસેન સ્વેન રૂપેણ કેવલમ્ ।
સ્તિમિતોદધિવદ્યોગી સ્વયં તિષ્ઠતિ નાન્યથા ॥ ૨૩॥

પરનિર્વાણનિષ્ઠસ્ય યોગિનઃ પરમાં સ્થિતિમ્ ।
સ્વયં ચ ન વિજાનાતિ ન હરિર્ન મહેશ્વરઃ ॥ ૨૪॥

ન મયા ચ પરિજ્ઞાતું શક્યતે યોગિનઃ સ્થિતિઃ ।
નાપિ વેદેન માનેન ન ચ સ્મૃતિપુરાણકૈઃ ॥ ૨૫॥

અહો નિર્વાણનિષ્ઠસ્ય યોગિનઃ પરમા સ્થિતિઃ ।
યાદૃશી પરમા નિષ્ઠા તાદૃશ્યેવ હિ કેવલમ્ ॥ ૨૬॥

એવંરૂપા પરા નિષ્ઠા શિવસ્યાસ્તિ સ્વભાવતઃ ।
શિવાયાશ્ચામ્બિકાભર્તુઃ પ્રસાદેન હરેરપિ ॥ ૨૭॥

તથા મમાપિ ચાન્યેષાં ન ચોદ્યોર્હો મહેશ્વરઃ ।
તાદૃગ્રૂપો મહાદેવઃ ખલુ સાક્ષાત્સનાતનઃ ॥ ૨૮॥

ઈદૃશી પરમા નિષ્ઠા ગુરોઃ સાક્ષાન્નિરીક્ષણાત્ ।
કર્મસામ્યે ત્વનાયાસાત્સિધ્યત્યેવ ન સંશયઃ ॥ ૨૯॥

દેશિકં દેવદેવેશં શિવં વિદ્યાદ્વિચક્ષણઃ ।
તદિષ્ટં સર્વયત્નેન પ્રકુર્યાત્સર્વદાઽઽદરાત્ ॥ ૩૦॥

સ્વસ્યાનિષ્ટમપિ પ્રાજ્ઞઃ પ્રકુર્યાદ્ગુરુણોદિતઃ ।
ગુરોરિષ્ટં પ્રકુર્વાણઃ પરં નિર્વાણમૃચ્છતિ ॥ ૩૧॥

સ્વાશ્રમં ચ સ્વજાતિં ચ સ્વકીર્તિં ચ તથૈવ ચ ।
સ્વાદૃષ્ટં લોકવિદ્વિષ્ટં બન્ધુપુત્રાદિસઙ્ગમમ્ ॥ ૩૨॥

ગૃહક્ષેત્રધનાદીનાં હાનિં ક્લેશં સુખં તથા ।
અનવેક્ષ્ય ગુરોરિષ્ટં કુર્યાન્નિત્યમતન્દ્રિતઃ ॥ ૩૩॥

ગુરૌ પ્રીતે શિવઃ સાક્ષાત્પ્રસન્નઃ પ્રતિભાસતે ।
ગુરોર્દેહે મહાદેવઃ સામ્બઃ સન્નિહિતઃ સદા ॥ ૩૪॥

ગુરોરનિષ્ટં મોહાદ્વા ન કુર્યાત્કુરુતે યદિ ।
પચ્યતે નરકે તીવ્રે યાવદાભૂતસમ્પ્લવમ્ ॥ ૩૫॥

શિવે ક્રુદ્ધે ગુરુસ્ત્રાતા ગુરૌ ક્રુદ્ધે ન કશ્ચન ।
તસ્માદિષ્ટં ગુરોઃ કુર્યાત્કાયેન મનસા ગિરા ॥ ૩૬॥

ગુરુર્નામાત્મનો નાન્યઃ સત્યમેવ ન સંશયઃ ।
આત્મલાભાત્પરો લાભો નાસ્તિ નાસ્તિ ન સંશયઃ ॥ ૩૭॥

અનાત્મરૂપં દેહાદિ યો દદાતિ પિતા તુ સઃ ।
ન ગુરુઃ કથિતઃ પ્રાજ્ઞૈઃ ક્લેશહેતુપ્રદો હિ સઃ ॥ ૩૮॥

અષ્ટૈશ્વર્યપ્રદસ્તદ્વદ્ગન્ધર્વાદિપદપ્રદઃ ।
સાર્વભૌમપ્રદશ્ચાપિ ન ગુરુઃ ક્લેશદો હિ સઃ ॥ ૩૯॥

મન્ત્રતન્ત્રાદિદસ્તદ્વલ્લૌકિકોપાયદસ્તથા ।
ન ગુરુઃ કથિતઃ પ્રાજ્ઞૈઃ ક્લેશહેતુપ્રદો હિ સઃ ॥ ૪૦॥

સત્યવત્સકલં ભાતં નિશ્ચિત્યાસત્યરૂપતઃ ।
સર્વસાક્ષિતયાઽઽત્માનં વિભજ્ય પરચેતનમ્ ॥ ૪૧॥

યસ્ત્વં તદિતિ વેદાન્તપ્રદીપેન સ્વકં નિજમ્ ।
શિવત્વં બોધયત્યેષ ગુરુઃ સાક્ષાન્ન ચાપરઃ ॥ ૪૨॥

દૃશ્યરૂપમિદં સર્વં દૃગ્રૂપેણ વિલાપ્ય ચ ।
દૃગ્રૂપં બ્રહ્મ યો વક્તિ સ ગુરુર્નાપરઃ પુમાન્ ॥ ૪૩॥

પરમાદ્વૈતવિજ્ઞાનં કૃપયૈવ દદાતિ યઃ ।
સોઽયં ગુરુગુરુઃ સાક્ષાચ્છિવ એવ ન સંશયઃ ॥ ૪૪॥

તાદૃશં દેશિકં સાક્ષાદ્વેદાન્તામ્બુજભાસ્કરમ્ ।
તોષયેત્સર્વયત્નેન શ્રેયસે ભૂયસે નરઃ ॥ ૪૫॥

સર્વવેદાન્તવાક્યાનામર્થઃ સઙ્ગ્રહરૂપતઃ ।

કથિતશ્ચ મયા દેવા મામાહ પરમેશ્વરઃ ॥ ૪૬॥

સર્વજ્ઞઃ સર્વવિત્સાક્ષાદાપ્તકામઃ કૃપાકરઃ ।
સર્વદોષવિનિર્મુક્તઃ સત્યમેવાબ્રવીન્મમ ॥ ૪૭॥

યથાઽઽહ સર્વવેદાનામર્થં સર્વજ્ઞ ઈશ્વરઃ ।
તથૈવ કથિતોઽસ્માભિઃ સત્યમેવ ન સંશયઃ ॥ ૪૮॥

સ્વપ્રકાશસ્વરૂપસ્ય સ્વતઃશુદ્ધસ્ય શૂલિનઃ ।
કરામલકવત્સર્વં પ્રત્યક્ષં હિ ન સંશયઃ ॥ ૪૯॥

વેદાનામન્યથૈવાર્થં યે વદન્તિ વિમોહિતાઃ ।
મહાસાહસિકા એવ તે નરા ન હિ સંશયઃ ॥ ૫૦॥

મદુક્તાર્થપ્રકારેણ વિના યે પ્રવદન્તિ તે ।
અન્ધકૂપે નિરાલમ્બે પતન્ત્યેવ ન સંશયઃ ॥ ૫૧॥

વેદાર્થઃ પરમાદ્વૈતં નેતરત્સુરપુઙ્ગવાઃ ।
નો ચેદત્રૈવ મે મૂર્ધા પતિષ્યતિ ન સંશયઃ ॥ ૫૨॥

અન્યથા વેદવાક્યાનામર્થ ઇત્યભિશઙ્કયા ।
અનિશ્ચિતાર્થશ્ચેન્મૂર્ધા યુષ્માકં ચ પતિષ્યતિ ॥ ૫૩॥

અતઃ પરં ન વક્તવ્યં વિદ્યતે સુરપુઙ્ગવાઃ ।
સત્યમેવ મયા પ્રોક્તં શમ્ભોઃ પાદૌ સ્પૃશામ્યહમ્ ॥ ૫૪॥

સૂત ઉવાચ ।
એવમુક્ત્વા મહાતેજા બ્રહ્મા ચ સુરપુઙ્ગવાન્ ।
પ્રત્યગ્ભૂતં પરાનન્દં પાર્વતીપતિમીશ્વરમ્ ॥ ૫૫॥

પરમાદ્વૈતરૂપં તં ભવરોગસ્ય ભેષજમ્ ।
સ્મૃત્વા નત્વા પુનઃ સ્તુત્વા ભક્ત્યા પરવશોઽભવત્ ॥ ૫૬॥

દેવાશ્ચ દેવદેવેશં સ્મૃત્વા સામ્બં ત્રિયમ્બકમ્ ।
પ્રણમ્ય દણ્ડવદ્ભૂમૌ વિવશા અભવન્મુદા ॥ ૫૭॥

દેવદેવો મહાદેવો મહાકારુણિકોત્તમઃ ।
તત્રૈવાવિરભૂદ્દેવ્યા સહ સત્યતપોધનાઃ ॥ ૫૮॥

વિષ્ણુશ્ચ પદ્મયા સાર્ધં તત્રૈવ બ્રહ્મવિત્તમાઃ ।
આગતો ભગવાન્દ્રષ્ટુમશેષસુરનાયકમ્ ॥ ૫૯॥

પુષ્પવૃષ્ટિરભવદ્યથા પુરા
 સ્વસ્તિપૂર્વવચનાનિ ચાભવન્ ।
તત્ર ભક્તિસહિતેન વિષ્ણુના
 પદ્મયા ચ પરિપૂજિતઃ શિવઃ ॥ ૬૦॥

શઙ્કરોઽપિ શશિશેખરઃ પર-
 સ્ત્વમ્બયૈવ સહિતઃ સનાતનઃ ।
તત્ર નૃત્યમકરોદતિપ્રભુઃ
 સ્વસ્વરૂપપરવેદનપ્રિયાત્ ॥ ૬૧॥

સર્વલોકજનની શિવા પરા
 પાપનાશકરબોધદાયિની ।
બ્રહ્મવજ્રધરપૂર્વકાનિમા-
 ન્સ્વાનુભૂતિસહિતેન ચક્ષુષા ॥ ૬૨॥

વિલોક્ય કારુણ્યબલેન કેવલં
 પ્રબોધયામાસ સુરોત્તમાનિમાન્ ।
પુનઃ પ્રજાનાથપુરઃસરાઃ સુરાઃ
 પ્રનૃત્યમાનં તુ શિવં શિવામપિ ॥ ૬૩॥

ત્વક્ચ્યક્ષુષૈવ દદૃશુઃ શ્રુતિમસ્તકોત્થ-
 વિજ્ઞાનરૂપપરલોચનગોચરાર્હમ્ ।
ભક્ત્યા પુનઃ પરમકારુણિકં મહાન્તં
 પઞ્ચાક્ષરેણ ભવપાશહરેણ પૂજ્યમ્ ॥ ૬૪॥

તુષ્ટવુઃ શ્રુતિવચોભિરાદરા-
 ન્નષ્ટકષ્ટભવપાશબન્ધનાઃ ।
ઇષ્ટસિદ્ધિરભવદ્ધિ યઃ સુરાઃ
 ઇત્યવોચદશુભાપહઃ શિવઃ ॥ ૬૫॥

શાઙ્કરી ચ શરણાગતપ્રિયા
 બન્ધહેતુમલનાશકારિણી ।
મત્પ્રસાદબલલબ્ધવેદના
 ઇત્યવોચદભવન્નતિપ્રિયા ॥ ૬૬॥

કેશવોઽપિ સુરપુઙ્ગવાન્પ્રતિ

પ્રાહ શમ્ભુરયમદ્ભુતઃ પ્રભુઃ ।
સર્વવેદશિરસામગોચરઃ
પ્રીત એવ ભવતામિતિ દ્વિજાઃ ॥ ૬૭॥

દેવોઽપિ કારુણ્યરસાર્દ્રમાનસઃ
સુરાનશેષાનજપૂર્વકાન્પ્રતિ ।
ઉવાચ ગીતામતિશોભનામિમાં
મમાનુકૂલામપિ યઃ પઠેદ્વિજઃ ॥ ૬૮॥

સ યાતિ મામેવ નિરસ્તબન્ધનઃ
પરા શિવા વાચિ સદૈવ વર્તતે ।
દિવાકરેણાપિ સમશ્ચ તેજસા
શ્રિયા મુકુન્દેન સમઃ સદા ભવેત્ ॥ ૬૯॥

એષા ગીતા બ્રહ્મગીતાભિધાના
શ્રુત્યા યુક્તા સર્વગીતોત્તમા ચ ।
વેદાકારા વેદનિષ્ઠૈર્દ્વિજેન્દ્રૈ-
ર્ભક્ત્યા પાઠ્યા નૈવ શૂદ્રાદિભિશ્ચ ॥ ૭૦॥

ઇત્યેવં પરમશિવઃ પ્રભાષ્ય નાથઃ
શિષ્ટાનામશુભહરઃ પુરત્રયારિઃ ।
ભક્તાનામમલસુખપ્રબોધકારી
તત્રૈવ સ્ફુરણસુખે તિરો બભૂવ ॥ ૭૧॥

દૈવી સા સકલજગદ્વિચિત્રચિત્રા
કારુણ્યાદખિલસુરાનજં વિલોક્ય ।
સુપ્રીતા પરમસુખપ્રબોધરૂપા
તત્રૈવ સ્ફુરણસુખે તિરો બભૂવ ॥ ૭૨॥

વિષ્ણુર્લક્ષ્મ્યા સાકમાશ્વાસ્ય દેવાન્
હૃષ્ટસ્તુષ્ટઃ સ્વસ્ય વૈકુણ્ઠમાપ ।
બ્રહ્મા દેવાનાત્મવિદ્યાભિયુક્તાં-
સ્ત્યક્ત્વા રુદ્રધ્યાનનિષ્ઠો બભૂવ ॥ ૭૩॥

દેવાઃ સર્વે દણ્ડવદ્ભૂમિભાગે
ભક્ત્યા સાર્ધં પદ્મયોનિં પ્રણમ્ય ।
હૃષ્ટાત્માનઃ સત્યબોધૈકનિષ્ઠાઃ

સદ્યઃ સ્વં સ્વં દેશમીયુર્દ્વિજેન્દ્રાઃ ॥ ૭૪॥

ઇત્થં સાક્ષાદ્બ્રહ્મગીતં ભવદ્ભિઃ
શુદ્ધજ્ઞાનૈરાદરેણ શ્રુતૈવ ।
મત્તઃ શ્રદ્ધાભક્તિયુક્તસ્ય વિપ્રા
નિત્યં દેયા નેતરસ્યાતિશુદ્ધા ॥ ૭૫॥

ઇતિ પરશિવભક્ત્યા પ્રાપ્તવિદ્યસ્તુ સૂતઃ
સુખઘનશિવતત્ત્વપ્રાપિકામેવ ગીતામ્ ।
મુનિગણહિતબુદ્ધ્યાઽઽભાષ્ય નિર્વાણરૂપં
પરતરમવલોક્ય પ્રજ્ઞયા મૌનમાપ ॥ ૭૬॥

મુનયશ્ચ ગુરું પરવેદિનં
પ્રણિપત્ય સમસ્તહિતપ્રદમ્ ।
હૃદયસ્થમહમ્પદલક્ષિતં
પરતત્ત્વતયૈવ વિદુઃ સ્થિરમ્ ॥ ૭૭॥

ઇતિ શ્રીબ્રહ્મગીતાસૂપનિષત્સુ શિવસ્યાહમ્પ્રત્યયાશ્રત્વં
નામ દ્વાદશોઽધ્યાયઃ ॥ ૧૨॥

॥ ઇતિ બ્રહ્મગીતા સમાપ્તા ॥

Encoded by Sunder Hattangadi
Proofread by Sunder Hattangadi, PSA Easwaran

*Brahma Gita Skanda Purana*
pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*